।। कोबातीर्थमंडन श्री महावीरस्वामिने नमः ।।

।। अनंतलब्धिनिधान श्री गौतमस्वामिने नमः ।।     ।। गणधर भगवंत श्री सुधर्मास्वामिने नमः ।।

।। योगनिष्ठ आचार्य श्रीमद् बुद्धिसागरसूरीश्वरेभ्यो नमः ।।     ।। चारित्रचूडामणि आचार्य श्रीमद् कैलाससागरसूरीश्वरेभ्यो नमः ।।

# आचार्य श्री कैलाससागरसूरि ज्ञानमंदिर

## पुनितप्रेरणा व आशीर्वाद

## राष्ट्रसंत श्रुतोद्धारक आचार्यदेव श्रीमत् पद्मसागरसूरीश्वरजी म. सा.

## जैन मुद्रित ग्रंथ स्केनिंग प्रकल्प

ग्रंथांक : १

**श्री महावीर जैन आराधना केन्द्र**

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-श्री महावीर जैन आराधना केन्द्र
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-३८२००७ (गुजरात)
(079) 23276252, 23276204
फेक्स : 23276249
**Websiet :** www.kobatirth.org
**Email :** Kendra@kobatirth.org

**शहर शाखा**

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
शहर शाखा
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
त्रण बंगला, टोलकनगर
परिवार डाइनिंग हॉल की गली में
पालडी, अहमदाबाद – ३८०००७
(079) 26582355

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पूज्य न्यायविशारद महामहोपाध्याय श्री यशोविजयजी म. विरचित

P-10094

# अध्यात्म उपनिषद

भुवनतिलकास्यटीकाकार

स्व. पू. आचार्य श्रीमद् विजयलब्धिसूरीश्वरजी म. के पट्टालंकार
स्व. पू. आचार्य श्रीमद् विजय भुवनतिलक सूरीश्वरजी म. के पट्टधर
पूज्य आचार्य श्रीमद् विजय भद्रंकर सूरीश्वरजी म. सा.

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

# क्रामपद्धतिः॥

For Private And Personal

।का:

३१ विष्णुपुराणम्
३२ शांडिल्यस्मृतिः
३३ कात्यायनसंहिता
३४ महाशंभुसंहितायां
३५ नृसिंहपुराणम्
३६ सनत्कुमारसंहिता
३७ वाराहपुराणम्
३८ ईश्वरसंहिता
३९ कर्मकाण्डम्
४० संध्याभाष्यम्
४१ बृहद्ब्रह्मसंहिता
४२ अगस्त्यसंहिता
४३ पाराशरम्
४४ मरीचिसंहिता
४५ विष्णुधर्मोत्तरम्

४६ पुरुषसूक्तम्
४७ पंचरात्रोक्तम्
४८ हरिभक्तिविलासः
४९ सामवेदेआम्नायोपनिषद्
५० ब्रह्माण्डपुराणम्
५१ बौद्धायनः
५२ दत्तात्रेयः
५३ परमेश्वरसंहिताः
५४ व्यासस्मृति
५५ आनंदतत्त्वदीपिका
५६ उशनाहम्
५७ आदित्यपुराणम्
५८ भरद्वाजसंहिता
५९ आगमे

# विषयानुक्रमणिका


| विषयाः | पृष्ठांकाः |
|---|---|
| १ गुरुस्तुतिः | १ |
| २ गुरुध्यानम् | १ |
| ३ मंगलम् | १ |
| ४ दीक्षामाहात्म्यम् | २ |
| ५ दीक्षाविधिः | ३ |
| ६ गुरुलक्षणम् | ५ |
| ७ गुरुमाहात्म्यम् | ५ |
| ८ शिष्यलक्षणंगुरुध्यानपूर्वकम् | ७ |
| ९ गुरुपुजा | ८ |
| १० रामानुजपंचरत्नधाटी | ८ |
| ११ रामानुजपंचकम् | ९ |
| १२ रामानुजप्रपत्तिः | १० |
| १३ भाष्यकारप्रपत्तिः | ११ |
| १४ रामानुजसुप्रभातम् | १२ |
| १५ भगवत्स्मरणम् | १३ |
| १६ प्रातःस्तवः | १४ |
| १७ रघुनाथचरणचिन्हस्तोत्रम् | १५ |
| १८ श्रीरामचंद्रस्यपरमात्मत्वम् | १६ |
| १९ प्रातःस्नानार्थोद्यमः | १८ |
| २० तत्रमृत्तिकाहरणविधिः | १९ |
| २१ मृत्तिकानियमः | १९ |
| २२ शुद्धिविधिः | २० |
| २३ दंतधावनविधिः | २० |
| २४ स्नानविधिः | २१ |
| २५ आसनविधिः | २२ |
| २६ पंचसंस्काराः | २२ |
| २७ तुलसीधारणविधिः | २ |
| २८ यथाक्रमंपंचसंस्कारमाहात्म्यम् | २३–२६ |
| २९ तत्रउर्द्धपुंड्माहात्म्यम् | २३ |
| ३० शंखचक्रादिमाहात्म्यम् | २३ |
| ३१ धनुर्बाणमाहात्म्यम् | २४ |
| ३२ नामकरणमाहात्म्यम् | २५ |
| ३३ मंत्रमाहात्म्यम् | २५ |
| ३४ धारणाविधिः | २६ |
| ३५ तत्रादौउर्द्धपुंड्रधारणाविधिः | २६ |
| ३६ निषेधलक्षणम् | २९ |
| ३७ शंखचक्रादिप्रार्थना | २९ |
| ३८ स्वात्मभावना | २९ |


For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir




| | विषयाः | पृष्ठांकाः |
|---|---|---|
| ३९ | तुलसीधारणविधिः | ३० |
| ४० | प्राणायामः | ३० |
| ४१ | कुशपवित्रधारणविधिः | ३० |
| ४२ | आचमनाविधिः | ३० |
| ४३ | अघमर्षणम्ः | ३१ |
| ४४ | भूतशुद्धिः | ३२ |
| ४५ | प्राणप्रतिष्ठा | ३२ |
| ४६ | गायत्रीविधिः | ३३ |
| ४७ | मुद्राविधिः | ३३ |
| ४८ | गायत्रीसंकल्पन्यासादयः | ३४ |
| ४९ | जपः | ३५ |
| ५० | स्तुतिः | ३६ |
| ५१ | विसर्जनम् | ३६ |
| ५२ | तर्पणम् | ३६ |

| | विषयाः | पृष्ठांकाः |
|---|---|---|
| ५३ | ध्यानम् | ३८ |
| ५४ | मंत्रोदाहरणम् | ३८ |
| ५५ | जपलक्षणम् | ३९ |
| ५६ | पूजाविधिः | ३९ |
| ५७ | विधिपूर्वकमर्चाविधिः | ४१ |
| ५८ | तुलसीस्नानमंत्रः | ४२ |
| ५९ | तुलसीविधिः | ४२ |
| ६० | पुष्पग्रहणविधिः | ४३ |
| ६१ | चरणोदकादिविधिः | ४३ |
| ६२ | धुपविधिः | ४४ |
| ६३ | आर्तिक्यविधिः | ४४ |
| ६४ | दंडवतलक्षणम् | ४४ |
| ६५ | दंडवतमाहात्म्यम् | ४४ |
| ६६ | पूजामंत्रविधिः | ४५ |

| | विषयाः | पृष्ठांकाः |
|---|---|---|
| ६७ | तत्रश्रुत्युक्तप्रमाणम् | ४५ |
| ६८ | पंचरात्रोक्तपुजामंत्राः | ४६ |
| ६९ | तत्रनैवेद्यविधिः | ४८ |
| ७० | अगस्त्यसंहितोक्तपूजामंत्राः | ४९ |
| ७१ | द्वात्रिंशदपराधाः | ५४ |
| ७२ | अष्टयामः | ५५ |
| ७३ | पादतीर्थमाहात्म्यम् | ५५ |
| ७४ | भगवत्प्रसादाशनविधिः | ५६ |
| ७५ | भगवत्प्रसादमाहात्म्यम् | ५७ |
| ७६ | आम्नायोपनिषद्दैशिक गुरुपरंपरा | |
| ७७ | ग्रंथकृद्दैशिकगुरुपरंपरा | |
| ७८ | द्विपंचाशद्द्वाराख्याचार्याः | |
| ७९ | वैष्णवसंप्रदायसंकेतकं | |


For Private And Personal

श्रीमतेरामानुजायनमः ॥ अथबृहद्ब्रह्मोक्तरामपद्धतिप्रारंभः ॥ अ
स्तुतिः॥ॐगुरुर्ब्रह्मागुरुर्विष्णुर्गुरुर्देवोमहेश्वरः ॥ गुरुरेवपरंब्रह्मतस्मैश्रीगुर
मः ॥ १ ॥ अज्ञानतिमिरांधस्यज्ञानांजनशलाकया ॥ चक्षुरुन्मीलितंयेनतस्
श्रीगुरवेनमः ॥ २ ॥ अखंडमंडलाकारंव्याप्तंयेनचराचरम् ॥ तत्पदंदर्शितंये
नतस्मैश्रीगुरवेनमः ॥ ३ ॥ सर्वश्रुतिशिरोरत्नंविराजितपदांबुजम् ॥ वेदान्ता
म्बुजसूर्य्यायतस्मैश्रीगुरवेनमः ॥ ४ ॥ यस्यस्मरणमात्रेणज्ञानमुत्पद्यतेस्वय
म् ॥ सएवसर्वसम्पत्तिस्तस्मैश्रीगुरवेनमः ॥५॥ ॥इतिगुरुस्तुतिः॥अथगुरु
ध्यानम्॥ ॥शिष्यशिरसिशुक्लाम्बुजंद्विनेत्रंद्विभुजंगुरुम्॥किरीटकुंडलवनमाला
ज्ञानमुद्रोपशोभितं ॥ १ ॥ कर्मणामनसावाचासदाआराधयेद्गुरुम् ॥ दीर्घदंड
वन्नमस्कृत्यनिर्लज्जोगुरुसन्निधौ ॥ २ ॥ सप्तसागरपर्यन्तंतीर्थस्नानादिकंफ

बृ. वे. लं ॥ गुरोरंघ्रिजलंबिंदुस्तत्कोटयंशेनदुर्लभम् ॥ ३ ॥ श्रीगुरुपंचोपचारैः स
म्पूज्य॥ गुरुपादोदकंपीत्वागुरोरुच्छिष्टभोजनम्॥ गुरुमूर्तिसदाध्यानंगुरुमंत्रंस
१ दाजपेत् ॥ ४ ॥ अखंडसच्चिदानंदमखिलेन्द्रियगोचरम् ॥ भक्तवत्सलभ
क्तेशमुत्पन्नंद्राविडेसुतम् ॥ ५ ॥ श्रीरामानुजयोगींद्रमत्यादिशरणंभजे ॥
श्रीरामाख्यंपरंनित्यंजीवन्मुक्तंस्वरूपिणं ॥ ६ ॥ ज्ञानमुद्राधरंरामंसच्चिदा
नदविग्रहम्॥ ब्राह्मेमुहूर्तेचोत्थायचिंतयेद्रघुनंदनम्॥ ७ ॥ इतिगुरुध्यानं ॥
॥ अथमंगलम्॥ ॥ नमोस्तुगुरवेतस्मैत्रयीदेवस्वरूपिणे ॥ यस्यवागमृतंहं
तिविषंसंसारसंज्ञकम् ॥ १ ॥ वांछाकल्पतरुभ्यश्चकृपासिंधुभ्यएवच
पतितानांपावनेभ्योवैष्णवेभ्योनमोनमः ॥ २ ॥ आचार्यशठकोपदेशि
थप्राचार्यपारंपरंश्रीमल्लक्ष्मणयोगिवर्ययमुनावास्तव्यनाथादिकान् ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ल्मीकिंसहनारदेनमुनिनावाग्देवतावल्लभंसीतालक्ष्मणवायुसूनुसहितं श्रीराम
चंद्रंभजे ॥ ३ ॥ वामेभूमिसुतापुरस्तुहनुमान्पश्चात्सुमित्रासुतः शत्रुघ्नोभरतश्च
पार्श्वंदलयोर्वाय्यव्यकोणादिषु॥ सुग्रीवश्चविभीषणश्चयुवराट्तारासुतोजाम्बवा
न्मध्येनीलसरोजकोमलरुचिंरामंभजेश्यामलं ॥ ४ ॥ नीलांभोधरकांतिकायम
निशंवीरासनाध्यासिनंमुद्रांज्ञानमयींदधानमपरंहस्ताम्बुजंजानुनि ॥ सीतांपा
र्श्वगतांसरोरुहकरांविद्युन्निभांराघवंपश्यंतंमुकुटांगदादिविविधैः कल्पोज्ज्वलां
गंभजे ॥५॥इतिमंगलम्॥ अथदीक्षामाहात्म्यं॥ विष्णुयामले॥दिव्यंज्ञानंय
तोदद्यात्कुर्यात्पापस्यसंक्षयं॥ तस्माद्दीक्षेतिसाप्रोक्तादेशिकैस्तंत्रकोविदैः॥१॥ अ
तोगुरुंप्रणम्यैवसर्वस्वंविनिवेद्यच ॥ गृह्णीयाद्वैष्णवंमंत्रंदीक्षापूर्वंविधानतः ॥२॥
स्कांदे॰ ब्रह्मनारदसंवादे ॥ ॥ तपस्विनः कर्मनिष्ठाः श्रेष्ठास्तेवैनराभुवि ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



प्राप्तायैस्तुहरेर्दीक्षासर्वदुःखविमोचनी ॥ ३ ॥ **तत्त्वसारे** ॥ ॥ यथाकांचनतांया
तिकांस्यंरसविधानतः ॥ तथादीक्षाविधानेनद्विजत्वंजायतेनृणां ॥ ४ ॥ अवश्यं
वैष्णवींदीक्षांप्रविशेत्सर्वयत्नतः ॥ दीक्षितस्यविशेषेणसंसिद्धिर्नात्रसंशयः ॥ ५ ॥
**तत्रमुमुक्षूणांदीक्षायाः कालनियमोनास्ति॥तथाहितत्त्वसारे॥** ॥ दुर्लभं
सद्गुरूणांतुसत्संगंतदुपास्थितम्॥ तदनुज्ञायदालब्धासदीक्षावासरोमहान् ॥ १ ॥
ग्रामेवायदिवाऽरण्येक्षेत्रेवादिवसेनिशि ॥ आगच्छतिगुरौदैवात्तदादीक्षांप्रकार
येत् ॥ २ ॥ यदैवेच्छातदादीक्षागुरोराज्ञानुसंयुतः ॥ नतीर्थंनव्रतंहोमोनस्नानंन
जपः क्रिया ॥ ३ ॥ दीक्षायाः करणंकिंतुस्वेच्छाप्राप्तेतुसद्गुरौ ॥ ४ ॥ **॥प्रपन्नामृते
रामानुजाचार्यवाक्यंस्वाचार्यप्रति॥** ॥ स्वपंतंवापिभुंजानंगच्छंतमपिवर्त्म
नि ॥ युवानमपिबालंवास्ववश्यंकुरुतेविधिः ॥ ५ ॥ इदमद्यकृतंकार्यंश्वोऽन्यत्का



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यंकरिष्यते ॥ इतिलोकेसबलवान्कृतांतोनसमीक्ष्यते ॥ ६ ॥ तस्मात्कार्यंशुभं
धीमाञ्छ्रेयस्कामोनरोत्तम ॥ विलंबेनकथंकर्तुमर्हसिद्विजसत्तम ॥ ७ ॥ ॥ मह्रो
द्धौ ॥ ॥ तदैवलग्नंसुदिनंतदैवताराबलंचंद्रबलंतदैव॥ विद्याबलंदैवबलंतदैव
सीतापतेर्नामयदास्मरेत॥८॥ इतिदीक्षामाहात्म्यं॥ ॥अथदीक्षाविधिःपंचरा
त्रे ॥ ॥ सौवर्णराजतंताम्रंकांस्यमायसमेववा ॥ चक्रंकृत्वातुमेधावीधारयेत्तद्वि
चक्षणः ॥ १ ॥ द्वादशारंतुषट्कोणंबलत्रयसमन्वितम् ॥ हरेःसुदर्शनंनित्यंधारये
त्तद्विचक्षणः ॥ २ ॥ तथाहि ॥ स्नात्वाशुभेन्हिपुर्वेऽन्हिसम्यगभ्यर्च्यकेशवम्
॥स्नातंशिष्यंसमाहूयकृतकौतुकमंगलम् ॥ ३ ॥ आचार्योविधिवत्कुर्याच्चक्रपुंड्रा
दिसत्क्रियाम् ॥ पुरतोऽग्निंप्रतिष्ठाप्यस्वगृह्योक्तविधानतः॥४॥ तस्माच्चक्रादिसं
स्काराः कर्तव्यामुनिसत्तम ॥ चक्रलांछनहीनेनकृतंकर्मचनिष्फलं ॥ ५ ॥ नारा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



यणायुधैर्युक्तंकृत्वात्मानंकलौयुगे ॥ कुरुतेपुण्यकर्माणिमेरुतुल्यानितानिवै ॥६॥
॥ पाद्मे ॥ भगवद्वाक्यं ॥ ॥ सुदर्शनंपांचजन्यंसौवर्णेनचपूरयेत् ॥ रौप्येणा
पिहिताम्रेणकांस्येनचायसेनवा ॥ ७ ॥ स्नाप्यपंचामृतैः शुद्धैरर्चयेत्पुरतोमम ॥
अर्चयेद्गंधपुष्पाद्यैस्तत्तन्मंत्रैर्विधानतः ॥ ८ ॥ तत्रसंस्थापयेदग्निंस्वगृह्योक्तवि
धानतः ॥ आचार्योजुहुयादाज्यंमंत्रेणाग्नौद्विजोत्तमः ॥ ९ ॥ अष्टोत्तरंसहस्रंवा
शतमष्टोत्तरंतथा ॥ जुहुयान्मूलमंत्रेणतथान्यैर्वैष्णवैः शुभैः ॥ १० ॥ मंत्रैः पुरु
षसूक्तैश्चजुहुयाद्घृतपायसं ॥ तस्मिन्नग्नौक्षिपेच्चक्रंशंखंचद्विजसत्तमः ॥ ११ ॥
षडक्षरेणजुहुयादष्टाविंशतिसंख्यया ॥ प्रतप्तंचक्रमादायमंत्रेणैवांकयेद्गुरुः ॥ १२ ॥
शंखेनचांकनंकुर्यादुभयोर्बाहुमूलयोः ॥ होमशेषंसमाप्याथपुनः पूजांसमाचरेत्
॥ १३ ॥ अथवाधनुर्बाणेनांकयेत् ॥ तथाच ॥ महारामायणे ॥ ॥ अग्नौवि



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

शुद्धहविषाविविधैः सुगंधैर्होमंसवेदविधिनाशरशार्ङ्गमंत्रैः ॥ अष्टोत्तरंशतविधिं
जुहुयात्सुभक्त्यारामंस्मरेद्धृदितथाजनकात्मजायाः ॥ १४ ॥ तप्तंधनुः शरमथो
खलुतत्रहोमैः प्रेम्णांकितंसुमनसाचगुरुः प्रकुर्यात् ॥ देशेषुचैवसकलेष्वपिसर्व
कालेवर्णाश्रमाश्वसकलांकितपुण्यपुंजाः ॥ १५ ॥ वामेकरेचधनुषाथशरेणचा
न्येयश्चांकितोहिमनुजोनरलोकधन्यः ॥ तस्मैनमंतिशिरसाद्रुहिणादिदेवास्तद्द
र्शनेनमनुजाः खलुकल्मषघ्नाः ॥ १६ ॥ यज्ञंचतीर्थगमनंपितृदेवसर्वंकुर्वंतिकर्म
शुभकंश्रुतयोवदंति ॥ योनांकितोधनुश्शरैर्विफलंचसर्वंयश्चांकितोधनुः शरैश्च
फलंसहस्त्रं ॥ १७॥ शक्रात्फलंशतगुणंधनुषश्शरस्ययश्चांकितोपिसचरामजना
ग्रगण्यः ॥ सारूप्यमेवलभतेकिलतत्क्षणंवैरामप्रियः प्रियतरोनुदिनंचमह्यं॥
॥ १८ ॥ ततः कलशमादायपवित्रोदकपूरितं ॥ मंत्रेणैवाभिमंत्र्याथतस्यमूर्ध्न्य

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



भिषेचयेत् ॥ १९ ॥ ऊर्ध्वपुंड्रधरंशिष्यंमंत्रमध्यापयेद्गुरुः ॥ मंत्रार्थश्चप्रयोक्त
व्योवृत्तिश्चैवविशेषतः ॥ २० ॥ नामधेयविधानंचवैष्णवंपापनाशनं ॥ मूर्तयः
केशवाद्याश्चतथासंकर्षणादयः ॥ २१ ॥ योजयेन्नामदासांतंभगवन्नामपूर्वकं ॥
तस्याशुभानिनश्यंतिपुण्यभागीभवेन्नरः॥२२॥ एवंतृतीयसंस्कारंकृत्वावैवैष्ण
वोत्तमः ॥ चतुर्थंमंत्रसंस्कारंकुर्वीतद्विजसत्तमः ॥ २३ ॥ एवंहिविधिनासम्यङ्
मंत्रसंस्कारसंस्कृतं ॥ मंत्रार्थतत्त्वविदुषंयागतंत्रेनियोजयेत् ॥ २४ ॥ ॥तथा
**चप्रपन्नामृतेरामानुजगुरुवाक्यं॥** ॥इदंतथ्यंतदामत्वारामानुजमभाषत ॥
विगाह्यागच्छविप्रेंद्रसरस्यस्मिन्शुभोदके ॥ २५॥ चक्रांकनंकरिष्यामित्वरमा
णस्यतेऽधुना ॥ इत्युक्त्वातंमाहाप्राज्ञंकांतिमत्यात्मसंभवं ॥ २६ ॥ स्नात्वाकृ
त्वाह्निकंप्राप्यविष्णोरायतनंशुभं॥तत्रत्यैर्वैष्णवैस्साकंप्रतिष्ठाप्यहुताशनं॥२७



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सचक्रेविधिनाहोममाज्यभागांतमादरात् ॥ ततः पुरुषसूक्तेनमूलमंत्रेणमंत्रवित्
॥२८॥अन्यैश्चवैष्णवैर्मंत्रैश्चरुणाज्येनभक्तितः॥अष्टोत्तरसहस्त्रंतुजुहावाग्नौसभू
सुरः॥ २९॥ चक्रराजंपांचजन्यंगंधपुष्पाक्षतैः शुभैः ॥ संपूज्यसुमहात्मानंलक्ष्म
णार्यंददर्शतम् ॥ ३० ॥ विप्रोत्तमंविष्णुभक्तंप्रांजलिंपुरतः स्थितं ॥ स्नातंविनय
संपन्नंनिर्मलंस्वच्छमानसम्॥३१॥सन्निधौरामचंद्रस्यकोदंडशरधारिणः ॥ तप्ता
भ्यांशंखचक्राभ्यांविधिनाग्नौकृपानिधिः॥३२॥लक्ष्मणार्यस्यभुजयोःसर्वलक्षण
युक्तयोः॥कृत्वांकनंतदातस्मैविधिनाऊर्ध्वपुंड्रकम्॥ ३३॥आपन्नरक्षकंमंत्रंदास्य
नामादिकंतथा॥अर्चारूपंदेवराजंप्रददौशिष्यवत्सलः॥३४॥पूर्णाचार्येणगुरुणा
कृतसंस्कारपंचकः॥रेजेरामानुजः श्रीमाञ्शरच्चंद्रइवामलः ॥ ३५ ॥ इतिदीक्षा
विधिः॥ **अथगुरुलक्षणम्॥हारीतस्मृतौ** ॥ ॥ आचार्यंसंश्रयेत्पूर्वमनवद्यं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



चवैष्णवम् ॥ शुद्धसत्वगुणोपेतंनवेज्याकर्मकारकम् ॥ १ ॥ सत्संप्रदायसंयुक्तं
मंत्ररत्नादिकोविदम् ॥ ज्ञानवैराग्यसंपन्नंवेदवेदांतपारगम् ॥ २ ॥ आलोक्य
सर्वशास्त्राणिपुराणानिचवैष्णवः ॥ तदर्थमाचरेद्यस्तुसआचार्यइतिस्मृतः ॥३॥
वाल्मीकीयेसुंदरकांडेटीकायां॥ ॥आचार्योवेदसंपन्नोविष्णुभक्तोविमत्सरः
॥मंत्रज्ञोमंत्रभक्तश्चसदामंत्राशयःशुचिः ॥४॥ गुरुभक्तिसमायुक्तः पुराणज्ञोवि
शेषतः ॥ एवंलक्षणसंपन्नोगुरुरित्यभिधीयते ॥ ५ ॥ ॥ वासिष्ठस्मृतौ ॥ ॥
जितेंद्रियाञ्शुभाचारान्सत्वस्थान्सर्वलक्षणान् ॥ श्रुतिस्मृतिपुराणार्थविदुषोदं
भवर्जितान् ॥ ६ ॥ ॥ बृहन्नारदीये ॥ ॥ मंत्रदातानचगुरुर्नचमंत्रार्थवाच
कः ॥ मंत्रमंत्रार्थतत्वज्ञोगुरुरित्यभिधीयते ॥७॥ इतिगुरुलक्षणं ॥ ॥ अथगुरु ५
माहात्म्यं तथाचश्रुतिः ॥ ॥ आचार्यवान्पुरुषोवेदेतिच्छंदोगाः ॥ १ ॥ यस्य

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

देवेपराभक्तिर्यथादेवेतथागुरौ ॥ तस्यैतेकथिताह्यर्थाःप्रकाशंतेमहात्मनः ॥२॥
देवतायागुरोश्चैवमंत्रस्यापिप्रकीर्तनात् ॥ ऐहिकामुष्मिकासिद्धिर्द्विजस्यास्तिन
संशयः ॥ ३॥ ॥ भागवते ॥ ॥ तस्माद्गुरुंप्रपद्येतजिज्ञासुःश्रेयआत्मनः ॥
शाब्देब्रह्मणिनिष्णातंब्रह्मण्युपसमाश्रयम् ॥ ४ ॥ यस्यसाक्षाद्भगवतिज्ञानदी
पप्रदेगुरौ॥भक्तिर्नस्याकृतंतस्यमन्येकुंजरशौचवत्॥५॥ ॥कठवल्ल्योपनिषदि॥
गुशब्दस्त्वंधकारःस्याद्रुशब्दस्तद्विरोधकः॥ अंधकारविरोधत्वाद्गुरुरित्यभिधीय
ते॥६॥भागवते॥ ॥आचार्यंमांविजानीयान्नावमन्येतकर्हिचित्॥नमर्त्यबुद्ध्या
सेवेतसर्वदेवमयोगुरुः ॥७॥ सर्वेवेदाश्चयज्ञाश्चतपोदानानिचानघ ॥ जीवाभय
प्रदानस्यनकुर्वीरन्कलामपि॥८॥ब्रह्मरुष्टेहरस्त्राताहररुष्टेहरिस्तथ॥॥हरिरुष्टेगुरु
स्त्रातागुरुरुष्टेनकश्चन ॥९॥ ॥ जयाख्यसंहितायाम् ॥ ॥यस्माद्देवोजगन्नाथः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



कृत्वामर्त्यमयींतनुं ॥ मग्नानुद्धरतेलोकान्कारुण्याच्छास्त्रपाणिना ॥ १० ॥ त
स्माद्भक्तिर्गुरौकार्यासंसारभयभीरुणा ॥११॥ ॥आलुवंदारभाष्ये॥ ॥ मंत्रे
तद्देवतायांचतथामंत्रप्रदेगुरौ ॥ त्रिषुभक्तिःसदाकार्यासाहिप्रथमसाधनम्॥१२॥
चक्षुर्गम्यंगुरुंत्यक्त्वाशास्त्रगम्यंतुयःस्मरेत् ॥ हस्तस्थमुदकंत्यक्त्वाघनस्थमभि
वांछति ॥ १३ ॥ सुलभंतंगुरुंत्यक्त्वादुर्लभंयदुपासते ॥ बुद्धंत्यक्त्वाधनंमूढोगुप्त
मन्वेषतिक्षितौ ॥ १४ ॥ मंत्रनाथंगुरुंमंत्रंसमत्वेनाभिपूजयेत् ॥१५॥ ॥महा
भारते॥ ॥ योदद्याद्भगवज्ज्ञानंकुर्याद्वाधर्मदर्शनम् ॥ कृत्स्नांचपृथिवींदद्यान्नत
त्तुल्यंकथंचन॥१६॥ ॥तंत्रे॥ ॥योगुरुःसहरिःसाक्षाद्योहरिःसगुरुःस्वयं॥ रुगु
र्यस्यभवेत्तुष्टस्तस्यतुष्टोहरिःस्वयं ॥१७॥ प्रपन्नामृतेवररंगाचार्यवाक्यंरामा
नुजंप्रति॥ ॥ गुरुरेवपरंब्रह्मगुरुरेवपरंधनम् ॥ गुरुरेवपरःकामोगुरुरेवपरायणः



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥१८॥ गुरुरेवपराविद्यागुरुरेवपरागतिः ॥ यस्मात्तदुपदेष्टासौतस्माद्गुरुतरोगुरुः ॥ १९ ॥ आचार्यस्तुहरिःसाक्षाच्चररूपीनसंशयः ॥ नमर्त्यबुद्ध्यासेवेतसर्वदेवमयोगुरुः ॥ २० ॥ इत्युक्तेनप्रकारेणह्यादिलक्ष्मणदेशिक ॥ उपायश्चाप्युपेयश्चगुरुरेवेतिभावय॥२१॥ इतिगुरुमाहात्म्यम्॥ ॥अथशिष्यलक्षणंगुरुध्यानपूर्वकं॥ ॥ब्रह्मरंध्रस्थितेपद्मेसहस्रदलशोभिते॥ श्रीगुरुंपरमात्मानंसहस्रादित्यसन्निभम्॥१॥ द्विनेत्रंद्विभुजंचैवध्यायेदखिलसिद्धिदम्॥ किरीटकुंडलवनमालाज्ञानमुद्रोपशोभितम् ॥ २ ॥ कर्मणामनसावाचासदाआराधयेद्गुरुं ॥ दीर्घदंडवन्नमस्कृत्यनिर्लज्जोगुरुसन्निधौ ॥ ३ ॥ सप्तसागरपर्यंततीर्थस्नानादिकंफलम् ॥ गुरोरंघ्रिजलंबिंदुस्तत्कोट्यंशेनदुर्लभम् ॥ ४ ॥ गुरोःपादोदकंपीत्वागुरोरुच्छिष्टभोजनम्॥ गुरोर्मूर्तेःसदाध्यानंगुरोर्मंत्रंसदाजपेत्॥५॥ ॥तथाचतंत्रे॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



यत्रयत्रगुरुंपश्येत्तत्रतत्रकृतांजलिः ॥ प्रणमेद्दंडवद्भूमौछिन्नमूलतरुस्तथा ॥ ६ ॥
गुरुशय्यासनंपानंपादुकापादपीठकम् ॥ वस्त्रंछायांतथाशिष्योलंघयेन्नकदाचन
॥ ७ ॥ गुरुसन्निहितेयस्तुपूजयेदन्यमग्रतः ॥ नसद्गतिंसमाप्नोतिपूजनंतस्यनि
ष्फलम् ॥ ८ ॥ ध्यानमूलंगुरोर्मूर्तिःपूजामूलंगुरोःपदं॥मंत्रमूलंगुरोर्वाक्यंभक्तिमू
लंगुरोःकृपा ॥ ९ ॥ गुर्वर्थेधारयेद्देहंगुर्वर्थेधनोपार्जनं ॥ गुरोःशुश्रूषणंकार्यंदेह
प्राणधनैरपि ॥ १० ॥ ॥ भागवते ॥ ॥ सायंप्रातरुपानीयभैक्ष्यंतस्मैनि
वेदयेत् ॥ यच्चान्यदप्यनुज्ञातमुपयुंजीतसंयतः ॥ ११ ॥ शुश्रूषमाणआचार्यं
सदोपासीतनीचवत् ॥ यानशय्यासनस्थानैर्नातिदूरात्कृतांजलिः ॥ १२ ॥
आचार्याधीनवृत्तिस्तुयावज्जीवंभवेत्सदा ॥ यावच्छरीरपातंतुह्रयमावर्त्तयेन्म
नुम् ॥ १३ ॥ येनकुर्वंतिगुर्वाज्ञांपापिष्ठास्तेनराधमाः ॥ नतेषांनरकक्लेशान्निस्ता



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रंमुनिसत्तम ॥ १४ ॥ इतिशिष्यलक्षणं ॥ ॥ इतिश्रीगुरुंपंचोपचारैःसं
पूज्यपश्चाद्भाष्यकारंसंस्मरेत् ॥ तत्रादौपद्मपुराणेपद्मखंडे ॥ ॥ पाषंड
बहुलेलोकेकुदृष्टिजनसंकुले ॥ कलौवैष्णवसिद्धांतैःपुनरुद्धार्यतेयतिः ॥ १ ॥
अनंतंप्रथमंनामद्वितीयंलक्ष्मणंतथा ॥ तृतीयंबलरामंचकलौरामानुजोयतिः ॥
॥२॥ ॥भागवते ॥ ॥ कलौखलुभविष्यंतिनारायणपरायणाः ॥ क्वचित्क्वचि
न्महाराजद्राविडेषुचभूरिशः ॥ ३ ॥ ताम्रपर्णीनदीयत्रकृतमालापयस्विनी ॥
कावेरीचमहापुण्याप्रतीचीचमहानदी ॥ ४ ॥ येपिबंतिजलंतासांमनुजामनुजे
श्वर ॥ प्रायोभक्ताभविष्यंतिवासुदेवेऽमलाशयाः ॥ ५ ॥ ॥ भार्गवपुराणेब्र
ह्मराक्षसवचनम् ॥ ॥ महासूर्यान्वयेपुण्येकेशवस्यत्रिपाठिनः ॥ जज्ञेपुण्य
वतःपुत्रोऽनंतांशोऽनंततेजसा ॥ ६ ॥ तस्यरामानुजइतिपितानामाकरोन्मुदा ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir





सर्वचेतनरक्षार्थमवतीर्णोदयानिधिः ॥ ७ ॥ तस्मादयंलक्ष्मणदेशिकेंद्रःसाक्षा
द्धरिर्लोकगुरुर्महात्मा ॥ तस्यैवसंबंधबलेनतेनमोक्षोहिसिद्धोनिखिलात्मताना
म् ॥ ८ ॥ एनंशेषांशसंभूतंरामानुजमुनिंविना ॥ नान्यःपुमान्समर्थस्स्यान्मज्ज
न्मेदंनिवारितुम् ॥ ९ ॥ तस्माद्यतींद्रसामर्थ्यमीश्वरस्यापिनास्तिहि ॥ यतोय
तींद्रसंबंधात्पापात्माह्यपिमुक्तिभाक् ॥ १० ॥ **॥ प्रपन्नामृते ॥** ॥ पाषंडबौ
द्धचार्वाकैस्त्रयीधर्मेविलोपिते ॥ दत्तात्रेयस्वरूपेणलोकेपाषंडसंकुले ॥ ११ ॥
त्रिदंडधारिणापूर्वंविष्णुनारक्षितात्रयी ॥ विष्णोस्तुपार्षदास्त्वद्यशेषशेषाशनाद
यः ॥ १२ ॥ अवतीर्णास्तुतेक्षित्यांदत्तात्रेयादयोयथा ॥ स्वेच्छाविहारिणस्ते
चनकर्मवशवर्तिनः ॥१३॥ इतिगुरुपूजा ॥ **॥ तथाच पंचरत्नघाटी ॥** ॥ पा
षंडद्रुमखंडदावदहनश्चार्वाकशैलाशनिर्बौद्धध्वांतनिरासवासरपतिर्जैनेभकंठीर



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वः ॥ मायावादभुजंगभंगगरुडस्त्रैविद्यचूडामणिःश्रीरंगेशजयध्वजोविजयतेरा
मानुजोऽयंमुनिः ॥ १ ॥ पाषंडखंडगिरिखंडनवज्रदंडाःप्रच्छन्नबौद्धमकरालयमं
थदंडाः॥वेदार्थसारसुखदर्शनदीपदंडारामानुजस्यविलसंतुमुनेस्त्रिदंडाः॥२॥ चा
रित्रोद्धारदंडंचतुरनयपथालंक्रियाकेतुदंडंसद्विद्यादीपदंडंसकलकलिकथासंहृते
कालदंडं ॥ त्रय्यंतालंबिदंडंत्रिभुवनविजयच्छत्रसौवर्णदंडंधत्तेरामानुजार्यःप्रति
पथिकशिरोवज्रदंडंत्रिदंडं ॥३॥ त्रय्यंमांगल्यसूत्रंत्रियुगयुगपथारोहणालंबसूत्रं
सद्विद्यायंत्रसूत्रंसगुणनयपथासंपदाहारसूत्रं ॥ प्रज्ञासूत्रंबुधानांप्रशमनमनयत्प
द्मिनीनालसूत्रंरक्षासूत्रंयतीनांजयतियतिपतेर्वक्षसिब्रह्मसूत्रम् ॥४॥ पाषंडसाग
रमहावडवामुखाग्निःश्रीरंगराजचरणांबुजमूलदासः॥ श्रीविष्णुलोकमणिमंडप
मार्गदायीरामानुजोविजयतेयतिराजराजः ॥ ५ ॥ इतिपंचघाटी ॥ ॥ अथ

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



रामानुजपंचकम् ॥ ॥ हेरामानुजहेपतेक्षितिपतेहेभाष्यकारप्रभोहेलीला
नरविग्रहानघविभोहेकांतिमत्यात्मज ॥ हेश्रीमन्प्रणतार्त्तिनाशनकृपामत्रप्रस
न्नार्यहेहेवेदांतयुगप्रवर्त्तकपरंजानामिनत्वांविना ॥ १ ॥ हेहारीतकुलारविंदत
रणेहेपुण्यसंकीर्त्तनब्रह्मध्यानपरात्रिदंडधरहेभूतिद्वयाधीश्वर ॥ हेरंगेशनियोजक
त्वरितहेगीःशोकसंहारकस्वामिन्हेवरदांबुदायकपरंजानामिनत्वांविना॥२॥ हे
श्रीभूतपुरीशलक्ष्मणमुनेहेयादवापादितापार्थार्थद्रुमकृंतनोग्रपुरुषहेभक्तिमंदा
रक ॥ हेब्रह्मासुरमोक्षणक्षमकृपाकूपारहेसज्जनप्रेष्ठामोघयतींद्रदेशिकपरंजा० ॥
॥ ३ ॥ हेपूर्णार्यकृपाब्दसहृयमनोमालाधरानुग्रहाज्ञातद्राविडवेदतत्वसुमतेम
न्नाथपृथ्वीधर ॥ कांचीपूर्णवरेण्यशिष्यभगवन्हेकेशवस्यात्मजश्रीपद्मेशपदाब्ज
षट्पदपरंजा० ॥ ४ ॥ हेगोपीजनमुक्तिदानकरहेशास्त्रार्थतत्त्वज्ञहेगोष्ठीपूर्णकृ

For Private And Personal

पागृहीतविलसन्मंत्राधिपोद्भास्करः ॥ हे त्वंतेष्टफलप्रदायकगुरो हे विठ्ठलेशार्चित
हे बौधायनसंमतानुगपरंजा० ॥५॥ इति रामानुजपंचकं ॥ ॥ अथ रामानुजप्र
पत्तिः ॥ ॥ श्रीकांतदिव्यपदपंकजसक्तचित्तश्रीकारिसूनुचरणांबुजभृंगराज ॥
श्रीवत्सचिन्हगुरुमानसराजहंसरामानुजार्यचरणौशरणंप्रपद्ये ॥१॥ नाथार्यया
मुनमुनींद्रकृपाकटाक्षसंलब्धबोधसकलश्रुतिमौलिवेद्य ॥ पूर्णार्यवर्यकरुणार्पित
मंत्ररत्नरामा० ॥२॥ श्रीरंगशेषगिरिवारणशैलनाथपादारविंदपरमानुभवैकशी
ल ॥ वेदांतयुग्मविशदीकरणैकधुर्यरामा० ॥३॥ डिल्लीशनीतमुपनीयतदीयकन्यां
सन्माननेनपुनरागतयादवाद्रिम् ॥ संपत्कुमारमभिषिक्तवतस्तवेमौरामा० ॥४॥
तुंडीरभूमिपतिसात्कृतशंखचक्रशेषाचलाधिपतयेकिलतेवतीर्य ॥ लोकैकनाथगुरु
भावमुपेयुषस्तेरामा० ॥५॥ कांचीभवःकतिपयंसमयेनदृष्टकालेनदृष्टपथमेतिपुन

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

बृ.वे. जनानाम् ॥ मूकोजगादभवतःफणिराजभावंरामा० ॥६॥बाह्यान्कुदृष्टिनिवहान रा.प.
पिसंनिरस्याद्वैतंविशिष्टमखिलश्रुतिमौलिवेद्यम्॥निर्द्धार्य्यसात्विकजनायनिदर्श
१० यंतौरामा०॥७॥ श्रीभाष्यनामकमिदंभवदीयभाष्यंश्रीभाष्यकारइतितेभुवने
प्रथास्यात् ॥ इत्यादरेणकिलसारदयास्तुतौतेरामा० ॥८॥ प्रयाणकालेचतुरः
स्वशिष्यानूपादांतिकस्थान्वरदोपवीक्ष्य ॥ भक्तिप्रपत्तिरपिवोयदिदुष्करेतेरा
मानुजार्यचरणौशरणंप्रपद्ये ॥९॥ त्वत्पादसेवनवशादधुनागुरूणांमुक्तिःकरेस्थि
तवतीतुपुरागुरूणां ॥ मूर्द्धान्वयादितिवदंतिविशुद्धभावंरामा० ॥१०॥ आर्यैश्च
तुष्कयुतसप्ततिपीठसंस्थैःसंसेवितौविमलसंयमिसप्तसप्त ॥ अन्यैस्तदीयनिव
हैरनुभाव्यमानौरामा० ॥ ११ ॥ रामानुजार्यरमणीयगुणाभिरामरागादिदुर्गम १०
गुरोयतिसार्वभौम ॥ सत्वप्रधानशरणागतवत्सलत्वंरामा० ॥१२॥ इतिरामानु

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

जप्रपत्तिः ॥ ॥अथभाष्यकारप्रपत्तिः॥ ॥ श्रीशैलगोष्ठिपरिपूर्णकृपोपलब्ध
रामायणार्थचरमोज्ज्वलपद्यसार ॥ पूर्णार्ययामुनमुनींद्रपदाब्जहंसश्रीभाष्यका
रचरणौशरणंप्रपद्ये ॥ १ ॥ उत्तारणायभववारिधिमाग्नजंतोरात्यूडुगेमहतिभूत
पुरेवतर्ण ॥ चैत्राख्यमासयतिशेखरलक्ष्मणार्यश्री० ॥ २ ॥ यांसानुविष्णुरहिरा
र्किमुसैन्ययोर्वासवैरतार्कितमहाविभवाय्र्यवर्य्य ॥ श्रीरंगनायकपदांबुरुहैकहंस
श्री०॥३॥ मालाधरात्तवकुलाभरणोक्तिसारश्रीयादवाचलसमादृतनित्यवास॥
सम्यक्कुमारतरमंबुरुहायताक्षश्री०॥४॥अष्टाक्षराख्यमनुचंद्रसुवासितास्यश्रीमं
त्ररत्नदशसंख्यमहार्थवादिन्॥कंठावलंबितुलसीनलिनाक्षमालाश्री०॥५॥श्री
भक्तिसारकुलशेखरभट्टनाथगोदासरोमुखसरोजसरोजबंधो॥कूटाधिनाथमुखदे
शिकचातकाभ्रश्री०॥६॥स्फूर्ज्जत्त्रिदंडतरुणार्कनिभांबुजाक्षशुभ्रोपवीतशिखयो

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



ज्ज्वलदेशिकेंद्र॥काषायचैलरुचिरोल्लसदूर्ध्वपुंड्रश्री० ॥७॥ व्याख्यांकुरुष्वमद
११ नुग्रहतःशठारिसूक्तेरहस्यमपियत्कुरुकाधिनाथ॥ इत्यब्रवीत्तुयदभाविगुरूपयो
गंश्री० ॥८॥ भाष्यामृतेनसकलस्वपदाश्रितानांसंजीवयत्यधिकयाकृपयाचते
षां॥चार्वाकशंकरतथागजदंतिसिंहश्री०।९। वेदार्थसंग्रहमथोनिरवद्यगद्यगीता
र्थभाष्यमथनित्यमुदग्रभाष्यं॥वेदांतदीपमपियोकृततस्यसारंश्री०॥१०॥सम्बं
धिनामपितुवीक्षसिमांप्रपन्नंमुक्तिंप्रयच्छकमलारमणेतियेन॥संप्रार्थितोहरिरथा
स्त्वितियंचभाष्यंश्री० ११ वेतालभूतशठजित्कलिवैरियोगीवेदादिपादसरसी
रुहराजहंस ॥ कांचीपुरीमुनिकृपारसपूर्णपात्रश्री०॥१२॥भट्टार्यरम्यवरयःशठ
कोपयोगिवेदांतदेशिकसरोरुहराजहंस॥ रामानुजार्ययतिराजदयैकसिंधोश्री० ११
॥१३॥ प्रपत्तिंभाष्यकारस्ययोऽधीतेसांप्रदायकीं ॥ सभवेत्सांप्रदायज्ञोरामानु

For Private And Personal

जमुनेःप्रियः ॥१४॥ इतिभाष्यकारप्रपत्तिः ॥ ॥ अथरामानुजसुप्रभातं ॥
पूर्णार्यपूर्णकरुणापरिलब्धबोधवैराग्यभुक्तिमुखदिव्यगुणामृताब्धे ॥ श्रीयामुना
र्यपदपंकजराजहंसरामानुजार्यभगवंस्तवसुप्रभातम् ॥१ ॥ आनेतुमद्यवरदस्य
गजाद्रिभर्त्तुःपानीयमच्छमतिशीतमगाधकूपात् ॥ ध्वान्तंनिरस्तमरुणस्यकरै
स्समंताद्रामानु० ॥२॥ श्रीरंगराजपदपंकजयोरशेषकैंकर्यमाकलयितुंसकुतूहल
स्त्वम् ॥ उत्तिष्ठनित्यविधिमप्यखिलंचकर्त्तुरामा० ॥ ३ ॥ त्वांवीक्षितुंसमु
पयातिवृषाचलेशस्त्वत्संप्रक्कृतवरशंखरथांगपाणिः ॥ संयोजितामुरसिमांभव
तैवबिभ्रद्रामा० ॥ ४ ॥ आराधनंरचयितुंकमलासनस्यश्रीयादवाचलपतेर्विवि
धोपचारैः ॥ पातुंचदृष्टिकमलेनमहानशेषान्रामा० ॥५॥ श्रीमत्कुरंगपरिपूर्णवि
भुस्त्वदुक्तिश्रीभाष्यशास्त्रमखिलंत्वयिभक्तियुक्तः ॥ श्रोतुंसमीक्षतियतीन्द्रधृ

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir





तोर्ध्वपुंड्रस्तंबोधयार्थमखिलंतवसुप्रभातम् ॥६ ॥ श्रीभाष्यमालिखितुमात्तवि
शाललेख्यःश्रीवत्सचिन्हगुरुरानतदिव्यगात्रः ॥ वेदान्तसूत्रमपिवक्तुममुष्यस
र्वंमुत्तिष्ठलक्ष्मणमुनेतवसुप्रभातम् ॥७॥ श्रीमान्सपूर्णपटुरादरतःप्रगृह्यश्रीपा
दुकांयतिपतेःपदयोःप्रयोक्तुम् ॥ द्वारिस्थितिंवितनुतेविनतार्तिहारिन्रामा० ॥
॥ ८ ॥ काषायवस्त्रकटिसूत्रकमण्डलुंचश्रीदंतकष्ठमपिदेशिकसार्वभौम ॥ पाणौ
निधायनिवसंतिविशुद्धगात्रारामा० ॥ ९ ॥ त्वांबोधयंतिगुरवःप्रथितामहान्तः
श्रीवैष्णवाश्रयमिनस्तवपादभक्ताः ॥ एकांतिश्चविमलास्त्वदनन्यभावास्तान्
पालयाद्ययतिशेखरसुप्रभातम् ॥ १० ॥ ब्राह्मेप्रबुध्याविबुधःस्वगुरून्प्रणम्यरा
मानुजायनमइत्यसकृद्ब्रुवाणः ॥ अष्टाक्षरंसचरमंद्वयमुच्चरंतिरामा० ॥ ११ ॥ १२
प्रातःपठंतिपरमद्राविडप्रबंधान्गायत्रिमंत्रशतमष्टशिरस्कमर्थान् ॥ श्रीवैष्णवा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्तवपदाब्जनिविष्टभारारामा० ॥१२॥ संसेव्यसप्तशतसंयमिसार्वभौमैःसद्देशि
कैस्सकलशास्त्रविदांवरिष्ठैः॥एकांतिभिःपरमभागवतैर्निषेव्यरामा०॥१३॥ स्त्रा
तुंकवेरतनयासलिलेषुशिष्यैराचार्यपूरुषवरैर्यतिभिर्विशुद्धैः ॥ श्रीवैष्णवैश्चसह
सेव्यमहानुभावैरामा० ॥१४॥गद्यत्रयंनिगमशेखरदीपसारौश्रुत्यर्थसंग्रहमपि
प्रथितुंचानित्यम् ॥ गीतार्थभाष्यमपिदेशिकपुंगवानांदातुंप्रसीदयतिशेखरसुप्र
भातम् ॥१५॥ पादांबुजंयतिपतेःशरणंप्रपत्तुंसंगत्यसंसरणवारिधितर्तुकामः ॥
आयंतिहस्तकमलोपधृतोपहारांस्तान्पालयार्ययतिशेखरसुप्रभातम् ॥ १६ ॥
रामानुजार्यरमणीयगुणाभिरामरागादिदुर्गमगुरोवरसार्वभौम ॥ सत्वप्रधानश
रणागतवत्सलत्वात्पादाब्जयोरिहपरत्रचकिंकरःस्याम् ॥ १७ ॥ संसेवितःसंय
मिसप्तसप्तपीठैश्चतुःसप्ततिभिःसमेतैः ॥ अन्यैरनन्यैरपिविष्णुभक्तैरास्तेधिरं

For Private And Personal

गंयतिसार्वभौमः ॥ १८ ॥ व्यासोवाभगवान्पराशरमुनिःश्रीशौनकोवाथवा
साक्षान्नारदसंयमिःशठरिपुर्वागीश्वरोवास्त्रयम् ॥ लोकेशःपुरुषोत्तमःफणिवरः
शेषोजगच्छेषिणइत्याख्योजगतांहितायसमभूद्रामानुजोयंमुनिः ॥ १९ ॥
इति रामानुजसुप्रभातम्॥ **॥इतिभाष्यकारंस्तुत्वाततोभगवंतंसंस्मरेत्॥**
**॥ तद्यथा ॥ अथभगवत्स्मरणम् ॥** ॥ ज्ञानमुद्राधरंरामंसच्चिदानंदविग्रहं
॥ब्राह्ममुहूर्त्तेचोत्थायचिंतयेद्रघुनदनं॥१॥ वैदेहीसहितंसुरद्रुमतलेहैमेमहामंड
पेमध्येपुष्पकमासनेमणिमयेवीरासनेसंस्थितं॥ अग्रेवाचयतिप्रभंजनसुतेतत्त्वं
मुनींद्रैःपरंव्याख्यातंभरतादिभिःपरिवृतंरामंभजेश्यामलं ॥२॥ रामंरत्नकिरी
टकुंडलयुतंकेयूरहारान्वितंसीतालंकृतवामभागममलंसिंहासनस्थंविभुं॥सुग्री
वादिहरीश्वरैःसुरगणैःसंसेव्यमानंसदाविश्वामित्रपराशरादिमुनिभिःसंस्तूयमा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नं प्रभुं ॥३॥ सकलगुणनिधानंयोगिभिस्स्तूयमानंभुजविजितविमानंराक्षसेंद्रा
दिमानं॥महितवृषभयानंसीतयाशोभमानं स्मृतहृदयविमानंब्रह्मरामाभिधानं
॥४॥इतिभगवत्स्मरण॥तथाप्रातस्स्तवः ॥ प्रातः स्मरामिरघुनाथमुखारविंदं
मंदस्मितंमधुरभाषिविशालभालं ॥ कर्णावलंबिचलकुंडलशोभिगंडंकर्णान्तदी
र्घनयनंनयनाभिरामं ॥१॥ प्रातर्नमामिरघुनाथपदारविंदंवज्रांकुशादिशुभरेखि
सुखावहंमे ॥ योगींद्रमानसमधुव्रतसेव्यमानंशापापहंसपदिगौतमधर्मपत्न्याः
॥२॥प्रातर्भजामिरघुनाथकरारविंदंरक्षोगणायभयदंवरदंनिजेभ्यः ॥ यद्राजसं
सदिविभज्यमहेशचापंसीताकरग्रहणमंगलमापसद्यः॥ ३ ॥ प्रातःश्रयेश्रुतिनु
तांरघुनाथमूर्तिंनीलांबुदोत्पलसितेतररत्ननीलां ॥ आमुक्तमौक्तिकविशेषविभूष
णाढ्यांध्येयांसमस्तमुनिभिर्निजमुक्तिहेतुं ॥४॥ प्रातर्वदामिवचसारघुनाथनाम

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



वाग्दोषहारिसकलंशमलंनिहंतृ ॥ यत्पार्वतीस्वपतिनासहमुक्तकामाभक्त्यास
हस्त्रहरिनामसमंजजाप ॥५॥ यः श्लोकपंचकमिदंमनुजःपठेतनित्यंप्रभातसम
येनियतः प्रबुद्धः॥ श्रीरामकिंकरजनेषुसएवमुख्योभूत्वाप्रयातिहरिलोकमनन्य
लभ्यं ॥ ६ ॥ ॥ तथाच ॥ ॥दूर्वादलद्युतितनुंतरुणाब्जनेत्रंहेमांबरंवरविभूष
णभूषितांगं ॥ कंदर्पकोटिकमनीयकिशोरमूर्तिंपूर्तमनोरथभवंभजजानकीशम्
॥१॥ कर्पूरगौरवपुषंशरदिंदुवक्त्रंनीलांबरंसरसिजाक्षमनंतमाद्यं ॥ वामोर्मिलं
ललितभूषणभूषितांगंरामानुजंभजमनोभयदंनिजानां ॥२॥ विश्वंभरंभरतमं
बुजपत्रनेत्रंनीलांबुदाभवपुषंकनकाभवस्त्रं॥ भक्ताभयप्रदमनेकविभूषणाढ्यंजा
ड्यंहरंसुजनतांभजमांडवीशं ॥ ३ ॥ कैशोरमूर्तिमनुरूपमनूपमंतं पुष्पेषुसुंदर
तनुंश्रुतिकीर्तिकांतं ॥ गौरंसुवर्णमणिभूषणमंबुजाक्षंपीतांबरंभजमनोऽखिलसि



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

द्धिहेतुं ॥ ४ ॥ उद्यद्दिनेशकररंजितकंजवक्त्रंपिंगारुणाब्जनयनंनयनाभिरामं ॥
सौवर्णवर्णवसनंरशनादिभूषंभक्तेषुकामदतरुंभजवायुसूनुं ॥ ५ ॥ इतिप्रातः
स्तवः ॥तथाच॥ **अथरघुनाथचरणचिन्हस्तोत्रम्** ॥ वंदेंबुजांकुशजयध्वज
चक्ररेखास्वस्त्यष्टकोणपविचिन्हितदक्षिणांघ्रिं ॥ बिंदुत्रिकोणधनुरंकुशमत्स्यशं
खचंद्रार्द्धगोष्पदघटांकितवामपादम् ॥ १ ॥ संचिंतयेज्जनमनश्चलषट्पदस्यवा
सायसुस्थिरतयांबुजमादधानम् ॥ मोहोपतापहतयेचकृपारसार्द्रंवंदेसदारघुवर
स्यपदारविंदम्॥२॥ संसेव्यमानजनमानसवारणस्यनानार्थभोगकलनाकारिणी
कृतस्य ॥ दुष्टस्यदोषहतयेंकुशमादधानं वंदे० ॥३॥ विद्यांजनायभजतेविमलां
प्रदतुंमोक्षंधनंचमुनिदेवदुरापमाशु ॥ बिभ्राणमुत्तमसुखंयवरूपमेकं वंदे० ॥४॥
श्रेयोयशोधनकरीत्यनुमोदकर्त्तुरेखध्वजोभयहरःस्वबलंवितेने ॥ मत्वादधान

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir





मसमानतमुन्निदानं वंदे० ॥ ५ ॥ सर्वोन्मुखस्यपुरुषस्यसतांप्रसंगात्कामादि
राक्षसशिरः करिकृंतनाय ॥ चक्रंदधानमनिशंकमलेक्षणस्यवंदे० ॥ ६ ॥ योमां
मुदंभजतिसंसृतिदोषदृष्टिरेकः सएवपुरुषः पुरुषेषु धन्यः ॥ सर्वोपरीतिगणने
दधदूर्ध्वरेखांवंदे० ॥७ ॥ मांलुब्धमुग्धमकृतःपुरुषस्यस्वस्तिस्वस्तीतितेप्रचुरमं
गलमूलभूतं ॥ श्रीस्वस्तिकंदधदनंतगुणार्णवस्यवंदे० ॥ ८॥ ध्यातुःक्षणंकृत
वतोविषयोग्रसर्पदंष्ट्रेंद्रियस्यमनुजस्यचिकित्सितायां ॥ यंत्रंचशापहरणंदधद
ष्टकोणं वंदे० ॥ ९ ॥ स्तोतुंमनःकृतवतःपुरुषस्यतत्तत्पापादिभेदनकृतेकुलिशं
दधानं ॥ योगींद्रवृंदहृदयाश्रयकोमलांघ्रिं वंदे० ॥ १० ॥ चित्तंनिजेकिल
निपुंजतरावपुंसः सद्योगसिद्धिरितियोगिजनैकभाव्यं ॥ बिभ्रत्समस्तपुरुषार्थ
वरंसुबिंदुंवंदे० ॥ ११ ॥ मत्सन्मुखस्यपुरुषस्यचभाग्ययोगान्नान्यत्रयात्विति



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मनोखिलमोहयंत्रं ॥ सौभाग्यसारसरणंचदधत्रिकोणंवंदे० ॥ १२ ॥ रामेति
वाचममलांसकृदप्यकस्मात्प्राणात्ययेपिवदतोंतिकमागतांस्तान् ॥ हंतुंयमस्य
वशगान्धनुषंदधानंवंदे० ॥ १३॥ नारायणेतिगिरमुद्गिरतःकदाचिन्मर्त्यान्पिधा
यबलवत्तरकालचक्रात् ॥ गोपुंदधद्भयजडार्त्तिहरंसुवासंवंदे०॥१४॥सर्वंविहाय
विषयंपुरुषाश्रयंमांयस्तेनदुर्जयतरोपिजितोभवाब्धिः॥ इत्थंजनायजयदंजल
जंदधानंवंदे० ॥१५॥ भग्नोनखांचलरुचाविधुरर्द्धमस्यभातीरिगंनिजजनश्रुति
निःसृतंसत् ॥ इंदुंदधानमपरंशरणागतंतद्वंदे० ॥१६॥ गोपालनेनचलतःपुरुषो
त्तमस्यलग्नंसुभृत्यजनवत्सलताभिमन्तुः ॥ संसारसिंधुमतिगोष्पदमादधानंव
न्दे ॥ १७ ॥ संध्यायतोनिजपदंगमनेनुकूलंमत्स्यंसुमंगलतरंसकलेष्टदोहम् ॥
आनन्दपूर्णममलंचघटंदधानंवन्दे०॥१८॥ ॥ इतिश्रीअगस्त्यमुनिकृतंरघु

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



नाथचरणचिन्हस्तोत्रम् ॥ एवमेव अन्यैश्चप्रातःस्तवादिभिःश्रीरघुना
थंसंस्मरेत् ॥ अथश्रीमद्रामचंद्रस्यपरमात्मत्वंनिरूप्यते॥तथाचहिरण्य
गर्भसंहितायां॥ ॥सशेषोशंखचक्राभ्यांदेवैर्ब्रह्मादिभिस्सह ॥ त्रेतायांचदाश
रथिर्भूत्वानारायणोभुवि ॥ १ ॥ शेषोभूल्लक्ष्मणोलक्ष्मीर्जानकीशंखचक्रके ॥
जातौभरतशत्रुघ्नौदेवास्सर्वेऽपिवानराः ॥२॥ ॥रामानुजभाष्ये॥ ॥ रकारा
र्थोरामस्सगुणपरमैश्वर्यजलधिर्मकारार्थोजीवस्सकलविधिकैंकर्यनिपुणः ॥ तयो
र्मध्याकारोयुगलमथसंबंधमनयोरनन्यार्हंब्रूतेत्रिनिगमसरूपोऽयमतुलः ॥ ३ ॥
जीवान्श्रीरमयत्यसौत्रिजगतांस्वानन्दकारीवपुस्तस्मैसाद्धिभवेकरोमिशरणंत
स्यामहंदेहभृत् ॥ तत्कैंकर्यप्रयोजनंममसदामंत्रेचतुर्थ्यानम इत्येवप्रतिपाद्यते
ऽत्रमनुनाह्यर्थस्तुवेदात्मकः ॥४॥ ॥ तथाच ॥ ॥ मत्स्यःकर्मोवराहोनरह



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रिरतुलोवामनोजामदग्निःसभ्रातांकंसशत्रुःकरुणमयवपुर्म्लेच्छविध्वंसनश्च ॥
एतेचान्येपिसर्वेंतराणिकुलभुवोयस्यजाता ःकलांशैस्तंव्याप्तंब्रह्मतेजोविमलगुण
मयंरामचन्द्रंनमामि ॥ ५ ॥ यजुर्वेदेसुदर्शनसंहितायां ॥ ॥ मत्स्यश्चराम
हृदयंयोगरूपीजनार्दनः ॥ कूर्मश्चाधारशक्तिश्चवराहोभुजयोर्बलम्॥६॥ नारसिं
होमहाकोपोवामनःकटिमेखला ॥ भार्गवोजंघयोर्जातोबलरामश्चपृष्ठतः ॥ ७ ॥
बौद्धश्चकरुणासाक्षात्कल्किश्चित्तस्यहर्षतः ॥ कृष्णःशृंगाररूपश्चवृंदावनात्रिभू
षणः ॥ ८ ॥ एतेचांशकलाःसर्वेरामस्तुभगवान्स्वयम् ॥९॥ ॥ सामवेदेभर
द्वाजसंहितायां ॥ ॥ अवताराबहवःसंतिकलाश्चांशाविभूतयः ॥ रामएवपरं
ब्रह्मसच्चिदानंदमव्ययम् ॥ ॥ वाल्मीकीये ॥१०॥ वेदवेद्येपरेपुंसिजातेदशर
थात्मजे ॥वेदःप्राचेतसादासीत्साक्षाद्रामायणात्मना॥११॥ ॥हारीतस्मृतौ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



॥ तस्मिन्नवम्यांशुक्लेतुनक्षत्रेदितिदैवते ॥ तत्रजातोजगन्नाथोराघवःपुरुषोत्तमः ॥१२॥ ॥ ज्योतिर्निबंधे ॥ ॥ चैत्रेमेषेसितेपक्षेनवम्यांतुपुनर्वसौ ॥ मध्याह्नेकर्कटेलग्नेजातोरामस्स्वयंहरिः ॥१३॥ ॥ ब्रह्मरहस्येब्रह्मनारदसंवादे ॥ ॥तत्रजागरिताःकेचित्केचिद्ध्यानविमोहिताः ॥ जपेकेचिच्चक्लिश्यंतिनैवजानंतितारकम् ॥ १४ ॥ ब्रह्मांडानामसंख्यानांब्रह्मविष्णुहरात्मनाम् ॥ उद्भवेप्रलयेहेतूरामएवइतिश्रुतिः ॥ १५ ॥ सृष्टिस्थित्यंतकरणेब्रह्मविष्णुमहेश्वराः ॥ यस्यायुतायुतांशांशायत्तद्ब्रह्मविधीयते ॥१६॥ सहस्रकोटियेसंतिब्रह्मांडास्तिर्यगूर्ध्वगाः ॥ ब्रह्माणोहरयोरुद्रास्तत्रतत्रव्यवस्थिताः॥१७॥ मनुस्मृतौ॥ ॥सप्तकोटिमहामंत्राश्चित्तविभ्रांतकारकाः ॥ एकएवपरोमंत्रोरामइत्यक्षरद्वयम् ॥ १८ ॥ ॥ पाद्मे ॥ ॥ ब्रह्मविष्णुमहेशाद्यायस्यांशालोकसाधकाः ॥ तमादिदेवंश्रीरा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मंविशुद्धंपरमंभजे ॥१९॥ ॥ अनंतसंहितायां ॥ ॥ रामनामप्रभावेणस्व
यंभूःसृजतेजगत् ॥ बिभर्त्तिसकलंविष्णुःशिवःसंहरतेपुनः ॥२०॥ ॥ उक्तंच
पुलस्त्यसंहितायां ॥ ॥ सर्ववेदाश्रयत्वाच्चसर्वलोकस्यकारणात् ॥ ईश्वर
प्रतिपाद्यत्वादखंडब्रह्मवाचकः ॥२१॥ बीजेयथास्थितोवृक्षःशाखापल्लवसंयुतः
॥ तथैवसर्ववेदाहिरकारेषुव्यवस्थिताः॥२२॥ रकाराज्जायतेब्रह्मारकाराज्जायतेह
रिः ॥ रकाराज्जायतेशंभूरकारात्सर्वशक्तयः ॥२३॥ आदावंतेतथामध्येरकारेषु
व्यवस्थितम् ॥ विश्वंचराचरंसर्वमवकाशेननित्यशः ॥२४॥ यथाकरंडेरत्नानि
गुप्तान्यज्ञैर्नदृश्यते ॥ तद्वन्मंत्राश्ववेदाश्वरकारेषुव्यवस्थिताः ॥२५॥ रकाराज्जा
यतेस्वर्गआकारान्मर्त्यसंभवः ॥ रसातलंमकारेणबीजात्रैलोक्यसंभवः ॥२६॥
रामित्येकाक्षरंब्रह्मकारणंप्रणवस्यच ॥ तस्माद्ब्रह्माहरिःशंभुर्योगिनःसमुपासते

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



॥ २७ ॥ रामनाम्नःपरंकिंचित्तत्त्वंवेदेस्मृतिष्वपि ॥ संहितासुपुराणेषुनैवतंत्रेषु
विद्यते ॥२८॥ ॥ अथर्वणेरामतापनीये ॥ ॥ अकाराक्षरसंभूतःसौमि
त्रिर्विश्वभावनः ॥ उकाराक्षरसंभूतःशत्रुघ्नस्तैजसात्मकः ॥२९॥ प्रज्ञात्मकस्तु
भरतोमकाराक्षरसंभवः ॥ अर्द्धमात्रात्मकोरामोब्रह्मानंदैकविग्रहः ॥३०॥ श्रीरा
मसान्निध्यवशाज्जगदानंददायिनी ॥ सृष्टिस्थितिलयानांचकारिणीसर्वदेहिनाम्
॥३१॥ सीताभगवतीज्ञेयामूलप्रकृतिसंज्ञिता ॥ प्रणवात्प्रकृतिरितिवदंतिब्रह्म
वादिनः ॥ ३२ ॥ ॥ इत्यादिश्रुतिस्मृतिभिःश्रीरामचंद्रस्यप्रमाणपरमा
त्मत्वंप्रसिद्धं ॥ अथप्रातःस्नानार्थोद्यमः ॥ ॥ समुद्रमेखलेदेविपर्वतस्तन
मंडले॥ विष्णुपत्निनमस्तुभ्यंपादस्पर्शंक्षमस्वमे ॥१॥ इतिपृथिवींसंप्रार्थ्य॥
श्रीमान्साधकेंद्रोदक्षिणांगेनसमुत्थायश्वासानुसारेणतस्यांपादौनिधायशौचाय



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

व्रजेत् ॥ ॥ **तथाच॥** ततोरुणोदयस्यांतेस्नानार्थंनिःसरेद्बहिः ॥ कीर्त्तयन्रा
मनामानितीर्थंगच्छेदनातुरः॥२॥गत्वातीर्थोदकंतत्रनिक्षिप्यस्नानसाधनं ॥ अ
थशौचादिकंकर्त्तुमाहरेन्मृत्तिकांबुधः ॥ ३ ॥ **॥ अथमृत्तिकाहरणविधिः ॥**
**तद्यथापुलस्त्यसंहितायां ॥** ॥ मृद्गौराब्राह्मणानांचवैष्णवानांविशेषतः ॥
नृपाणांलोहिताज्ञेयावैश्यानांतुहरिच्छुभा ॥ स्त्रीशूद्राणामंत्यजानांकृष्णवर्णा
प्रतिष्ठिता ॥४॥ **॥ सरोजगलिकायां ॥** विनाकाष्ठेनलोहेनउद्धृतायाचमृत्ति
का ॥ श्वानाविष्टासमाज्ञेयाशौचकालेविवर्ज्जयेत् ॥५॥ पूर्वंसंप्राथ्यर्पृथिवींनित्यं
वैमंत्रपूर्वकं ॥ शुद्धमृत्तिकामानीयत्रिभागंकुर्याद्बुधः ॥ ६ ॥ आद्यंलिंगेगुदेदेशोद्वि
तीयंकरपादयोः ॥ तृतीयंभागमादायस्नानकालेप्रलेपयेत् ॥७॥ **॥ इतिमृत्ति
काहरणविधिः ॥** ॥ त्वंधरेसर्वभूतानांक्षमायुक्तासिनित्यशः ॥ नित्यकर्मक

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir





रिष्यामिमृत्तिकांदेहिमेमाहि ॥८॥ येनत्वांखनतिब्रह्मायेनत्वांरुद्रकेशवौ ॥ तेन
त्वां खनयिष्यामिशुद्ध्यर्थंकरपादयोः ॥ ९ ॥ ॥ इतिमृत्तिकाहरणमंत्रः ॥
सलिलस्यमुखंदृष्ट्वाविष्णुरूपंनमोस्तुते ॥ क्रियार्थमहंगृह्णामिआपोदेव्यःपुनंतु
माम्॥१०॥ ॥इतिजलग्रहणमंत्रः॥ ॥ततोबहिर्गच्छेन्नैर्ऋत्यांदिशिगत्वासूर्यं
र्यंदक्षिणेदत्वावस्त्रेणशिरःप्रावृत्ययज्ञोपवीतंदक्षिणकर्णेनिधाय ॥ ॥ अथशौ
चमंत्रः ॥ ॥ उत्तिष्ठंतुसुरास्सर्वेयक्षगंधर्वकिन्नराः ॥ पिशाचागुह्यकाश्चैवमल
मूत्रंकरोम्यहम् ॥११॥ ॥ इतिमंत्रेणतालत्रयंकृत्वाशौचसमयेउच्चारणं
कुर्यात् ॥ ॥ अथमृत्तिकानियमः॥विष्णुपुराणे॥ ॥एकालिंगेगुदेपंचतथा
वामकरेदश ॥ उभयोःसप्तदातव्यामृदःशौचोपपादिताः ॥ १२ ॥ तिस्रस्तुपाद
योर्देयाःशुद्धिकामेननित्यशः ॥ करपृष्ठेचषट्देयास्तिस्रश्चनखशोधने ॥ १३ ॥



For Private And Personal

दिवाविहितशौचाच्चरात्रावर्द्धंसमाचरेत् ॥ रुज्यर्द्धंचतदर्द्धंचपथिचौरादिबाधिते
॥ १४ ॥ तदर्द्धंयोषितांचापिस्वास्थ्येनूनंनकारयेत् ॥ अर्धधात्रीफलोन्मानामृदः
शौचेप्रकीर्तिताः॥१५॥वितस्तिमात्रंसंत्यज्यकुर्याच्छौचंजलाशये॥यस्मिन्स्थाने
कृतंशौचंवारिणातत्तुशोधयेत् ॥१६॥ एतद्गृहस्थप्रमाणंब्रह्मचारिणोद्विगुणम् ॥
वानप्रस्थस्यत्रिगुणंसंन्यासिनांचतुर्गुणं ॥ १७ ॥ **॥ इतिमृत्तिकानियमः ॥**

**अथशुद्धिविधिः ॥** ॥ अश्वक्रांतेरथक्रान्तेविष्णुक्रांतेवसुंधरे ॥ मृत्तिकेहरमे
पापंयन्मयापूर्वसंचितम् ॥१८॥ **॥ इतिमृत्तिकाशुद्धिमंत्रः ॥ अथपात्रनिर्ण
यंमहाशंभुसंहितायांअगस्त्यवाक्यम् ॥** ॥ यज्ञोपवीतंधौतंचकौपीनाच्छा
दनंपरं ॥गृह्णंतुधातुपात्रंवातुम्बिकारामसेवकाः॥१९॥ **॥ तथाच ॥** ॥यतिपा
त्राण्यारकूटालाबुदारुमयानिच॥ **॥ तथाच ॥** ॥अलाबुदारुपात्रंचमृन्मयं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



वैणवंतथा॥एतानियतिपात्राणिप्रसिद्धानिभवंतिहि॥२०॥ ॥अथशुद्धिविधिः॥
॥ आरकूटस्यरजसादार्वालाब्वोर्जलेनवै ॥ क्षालनेनैवशुद्धिःस्यात्केषांमृद्वेणुपात्र
कम्॥२१॥ **तथाच** ॥ ॥भस्मनाशुद्ध्यतेकांस्यंताम्रमम्लेनशुद्ध्यति ॥ रजसा
शुद्ध्यतेनारीनदीवेगेनशुद्ध्यते॥२२॥ ॥**इतिशुद्धिविधिः**॥ ॥ॐजलंदहतिपा
पानिकमंडलायतनोभवेत् ॥ गंगातोयंसमोनित्यंजलपात्रंचशुद्ध्यति ॥ २३ ॥
॥ **इतितुंबिकापात्रशुद्धिमंत्र** ॥ ॥ जलेचाग्निस्स्थलेचाग्निरग्निश्चवायुमंडले ॥
त्रिभिराग्निप्रकाशैश्चकाष्ठपात्रंचशुद्ध्यते ॥ २४ ॥ ॥ **इतिकाष्ठपात्रशुद्धिमंत्रः** ॥
॥**अथदंतधावनविधिः**॥ ॥खदिरश्चकरंजश्चकदंबश्चवटस्तथा ॥ चिंचिणीवेणु
पृष्ठंचआम्रंनिम्बस्तथैवच॥२५॥अपामार्गश्चबिल्वश्चअर्कश्चोदुंबरस्तथ॥एताः
प्रशस्ताःकथितादंतधावनकर्माणि २६ सर्वेकंटकिनःपुण्याआयुर्दाक्षीरिणस्तथा



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कटुतिक्तकषायाश्चबलारोग्यसुखप्रदाः ॥२७॥ द्वादशांगुलमानेनदंतकाष्ठंविधी
यते ॥ क्षत्रविट्शूद्रवर्णानांनवषट्चतुरंगुलम् ॥ २८ ॥ कनिष्ठाग्रपरिणाहंसत्व
चंनिर्व्रणंऋजु ॥ चूतपत्रं सदाग्राह्यंप्रतिषिद्धेदिनेदिने॥२९॥ ॥**इतिदंतका
ष्ठविधिः** ॥ ॥ नमस्तेऽमृतवर्चसेबलवीर्यविवर्धिनि ॥ बलमायुश्चमेदेहिपापा
न्मांत्राहिदूरतः ॥ ३० ॥ ॥ **इतिवनस्पतिंप्रार्थ्य** ॥**तथाच कात्यायनः** ॥
॥ आयुर्बलंयशोवर्चःप्रजापशुवसूनिच ॥ ब्रह्मप्रज्ञांचमेधांचत्वन्नोदेहिवनस्पते
॥ ३१ ॥ ॥**इतिदंतकाष्ठछेदनमंत्रः**॥ ॥ दंतरूपमघोगंचदंतधावनमुत्फलं
॥ कुर्वन्तिचत्रयोदेवाममदोषोनदीयतां ॥३२॥ ॥**इतिदंतधावनमंत्रः**॥ ॥
कासीकुशीपलाशीचकपासीकंटकीतथा ॥ दन्तधावनकर्त्तव्यंसद्योगोमांसभक्ष
णम् ॥ ३३॥ दक्षिणेपश्चिमेयोवैदंतधावनमाचरेत् ॥ तस्यस्नानफलंनास्तितद

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



न्यस्यांसमाचरेत् ॥ ३४ ॥ ॥ अथस्नानविधिः ॥ ॥ ततोदेहकृत्यंदंतधाव
नादिकंकृत्वा नामोच्चारणंकुर्य्यात्नद्यादौतीर्थेगत्वातत्रहस्तौपादौमुखंचप्रक्षा
ल्य॥आचम्यषडंगन्यासं॥ ॥ॐवाक् ॐवाक्ॐप्राणॐ प्राणॐ चक्षुःॐ चक्षुःइ
तिचकृत्वाप्राणायामंमलापकर्षणंस्नानंचकृत्वानाभिमात्रेजलेस्थित्वाॐविष्णुः
ॐ विष्णुः ॐ विष्णुः इत्याचमनमंत्रः ॥ ॥ तथाचकात्यायनसंहितायां ॥
॥गोकर्णाकृतिहस्तेनमाषमात्रंजलंपिबेत् ॥ तन्न्यूनमधिकंचैवसुरापानसमंभवे
त ॥ ॥ इत्याचमनप्रमाणं ॥ ॥ ॐआद्यपुराणपुरुषोत्तमायब्रह्मणेनमः ॥
ॐअद्यश्रीब्रह्मणोद्वितीयेपरार्धे श्रीश्वेतवाराहकल्पेवैवस्वतमन्वंतरे अष्टाविंश
तिकलियुगेजम्बुद्वीपेभरतखंडे आर्यावर्ते अमुकसंवत्सरे अमुकमासेअमुकपक्षे २१
अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकक्षेत्रे अमुकतीर्थेअमुकदासः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्रीरामप्रीत्यर्थंप्रातःस्नानमहंकरिष्ये ॥ ॥ इतिसंकल्पः ॥ ॥ जलेप्रणवात्म
कंत्रिकोणंकृत्वाऽष्टदलंमंडलंविलिख्यसूर्यमंडलादंकुशमुद्रयासर्वतीर्थान्यावाह्य
ॐ ब्रह्मांडोदरतीर्थानिकरैः स्पृष्टानितेरवे ॥ तेनसत्येनमेदेवतीर्थंदेहिदिवाकर
॥ १ ॥ गंगेचयमुनेचैवगोदावरिसरस्वति ॥ नर्मदेसिंधुकावेरिजलेस्मिन्संनि
धिंकुरु ॥ २ ॥ ततः सुरभियोनिकुंभकंलिंगंमुद्रांप्रदर्शयेत् इतिमंत्रद्वयेनतीर्था
न्यावाह्यकुंभकमुद्रयाशिरसित्रिरभिषिंच्यमूलमंत्रोच्चारणं ततोनिरुध्यसप्तछि
द्राणित्रिर्निमज्योन्मज्यचजलेनत्रिराचम्यजलेनतिलकंविधाय गायत्र्याशिखा
बंधनंकृत्वामूलेनश्रीरामंसंतर्पयामिस्वाहा ॥अथवा॥ ब्रह्मनामसहस्रेणाशिव
नामशतेनच॥विष्णोर्नामसहस्रैस्तुशिखाबंधंकरोम्यहं ॥ ३॥ इतिशिखाबंधनं॥
ब्रह्मपुत्रीशिखायांचब्रह्मदंडतपस्विनी ॥ सर्वदेवनमस्कारैःशिखामुक्तिंकरोम्यहं

For Private And Personal

॥४॥ इतिशिखामुक्तिमंत्रः ॥इतिस्नानविधिः॥ ततस्तत्रैवस्वस्थानंवाग
च्छेत् ततोवासांसिजलेनशुद्धीकुर्यात् ॥ अपवित्रःपवित्रोवासर्वावस्थांगतो
पिवा ॥ यःस्मरेत्पुंडरीकाक्षंसबाह्याभ्यंतरःशुचिः ॥ ५ ॥ ॥ इतिमंत्रः॥ ॥
ततःआसनविधिः ॥ ॥ गोमयेनशुद्धमृदाभूमिमादौप्रलेपयेत् ॥ कृष्णा
जिनंकुशासनमासनंपरिकल्पयेत् ॥ ६ ॥ ॐ भूर्भुवःस्वः कूर्मायनमःइतिमंत्र
मुच्चार्यसुरभिमुद्रांप्रदर्शयेत्॥ॐ पृथ्वित्वयाधृतालोकादेवित्वंविष्णुनाधृता॥ त्वं
चधारयमांदेविपवित्रंकुरुचासनम् ॥ ॥ इतिमंत्रेणतत्रासनेउपविश्यपंचसंस्का
रान्भावयेत् ॥अथपंचसंस्काराः॥ ॥ॐ संप्रदायानुसारेणयथाक्रमंप्रदर्श्यंते ॥
प्रथमंचयजुर्वेदेहिरण्यकेशिशाखायां ॥ ऊर्ध्वपुंड्रंहरिपादाकृतिआत्मनोनिर्द्धार २२
यति ॥ मध्यछिद्रमूर्ध्वपुंड्रंयोधारयतिसपरस्यप्रियोभवतिसपुण्यवान्समुक्तिभा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ग्भवति ॥ ॥ इतिश्रुतिप्रथमसंस्कारः ॥ १ ॥ धृतोर्ध्वपुंड्रंचक्रधारीविष्णु
परंध्यायति ॥ योमहात्मास्वरेणमंत्रेणसदाहृदिस्थितंपरात्परंसयातिमहतोमही
यान् ॥ इतिश्रुतिद्वितीयसंस्कारः ॥ ॥ २ ॥ पशुपुत्रादिकान्सर्वाननुगृह्णोप
करणानिच ॥ अंकयेच्छंखचक्राभ्यांनामकुर्याच्चवैष्णवं ॥ इतिश्रुतिस्मृतितृ
तीयसंस्कारः ॥ ३ ॥ ॥ ॐ रांरामायनमःइतिमंत्रम् ॥ ॥ अथर्ववेदेराम
तापनीयोपनिषदिचतुर्थसंस्कारः ॥ ४ ॥ शंखचक्रधरोविद्वान्मालांतुलसि
जांधृतः ॥ सजीवन्मुक्तः॥ इतिश्रुतिपंचमसंस्कारः॥५॥ ॥ तथाचागमे ॥
पुंड्रंमुद्रातथानाममंत्रोयागश्चपंचमं॥अमीहिपंचसंस्काराः परमैकांतहेतवः॥६॥
इतिपंचसंस्कारसंस्कृतोयः सवैष्णवःनान्यथेतिभावः ॥ सरामस्यदासोभवति
दासोहमस्मियोयंस्मरेत्सतद्रूपोभवति ॥ कीटभृंगन्यायेनस्वस्वरूपस्मरणात्॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



तरतिशोकमात्मविद्ब्रह्मविद्ब्रह्मैवभवति ॥ अथतुलसीभगवतोभेंदाभावेयाग
स्थानेतुलसीधारणंनाविरोधः ॥ ॥ इतियजुर्वेदपंचसंस्कारः ॥ अथतुलसी
धारणविधिः ॥ तथाचशांडिल्यस्मृतौ ॥ ॥ शालग्रामशिलातुल्यातुलसी
काष्ठमालिका ॥ नभेदोस्तितयोः किंचित्तस्मात्स्नात्वाचधारयेत् ॥१॥ तथाच
पाद्मे ॥ ॥ तुलसीमालिकाधृत्वायोभुंक्तेगिरिनंदनी ॥ सिक्थेसिक्थेसलभते
वाजपेयफलंशुभम् ॥ २ ॥ यत्कंठेतुलसीनास्तितेनरामूढमानसाः ॥ अन्नंवि
ष्ठाजलंमूत्रंपीयूषंरुधिरंभवेत् ॥ ३ ॥ ॥ तथाचस्कान्दे ॥ यज्ञोपवीतवद्धा
र्याकंठेतुलसिमालिका ॥ नशौचंधारणेतस्यायतस्साब्रह्मरूपिणी ॥४॥ कंठेशिर
सिबाह्वोश्चकर्णयोःकरयोस्तथा ॥ बिभृयात्तुलसीयस्तुसज्ञेयोविष्णुनासमः ॥५॥ 
॥ अथयथाक्रमंपंचसंस्कारमाहात्म्यं ॥ तथा च पाद्मे ॥ ॥ यच्छरीरंम

For Private And Personal

नुष्याणामूर्द्ध्वपुंड्रंविनाभवेत् ॥ तस्यदर्शनमात्रेणश्मशानसदृशोभवेत् ॥ १ ॥
योगोदानंतथाहोमःस्वाध्यायःपितृतर्पणं ॥ भस्मीभवतितत्सर्वमूर्ध्वपुंड्रंविना
कृतं ॥२॥ ऊर्ध्वपुंड्रधरोमर्त्योमृत्युमाप्नोतिकुत्रचित्॥सगच्छतिपरंस्थानंदेवाद्यै
रपिदुर्लभं ॥ ३ ॥ तस्माच्छिद्रान्वितंपुंड्रंहरिद्रांधारयेच्छ्रियं ॥ सात्विकोवैष्ण
वोनित्यंहरिसायुज्यसिद्धये॥ ४ ॥ ऊर्ध्वपुंड्रमृजुंसौम्यंललाटेपरिशोभितं ॥
चांडालोपिविशुद्धात्मापूजामाप्नोतिधारणात् ॥ ५ ॥ सर्पदृष्टायथालोकेदर्दुरा
भयकंपिताः ॥ ऊर्ध्वपुंड्रांकितंतद्वत्कंपंतेयमकिंकराः॥ ६ ॥ ऊर्ध्वपुंड्रेणसंयुक्तो
म्रियतेयस्तुमानवः ॥ चांडालोपिविशुद्धात्माविष्णुलोकेमहीयते ॥७॥ इत्यूर्ध्व
पुंड्रमाहात्म्यं॥ ॥अथशंखचक्रादिमाहात्म्यंआदित्यपुराणे॥ शंखचक्रोर्ध्व
पुंड्रादिरहितंब्राह्मणाधमं॥ गर्दभेतुसमारोप्यराजाराष्ट्रात्प्रवासयेत् ॥ १ ॥ शं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



खचक्रादिभिश्चिन्हैर्विप्रःप्रियतमैर्हरेः ॥ रहितःसर्वधर्मेभ्योमृतोपिनरकंव्रजेत
॥२॥चक्रचिन्हविहीनस्तुयःपूजयतिकेशवं ॥ तत्सर्वंनिष्फलंयातिपूजामंत्रजपा
दिकं ॥ ३ ॥ सुदर्शनेनयस्यांगंलांछितंवैभवेत्सदा ॥ तस्यदेहेवसेन्नित्यंश्रि
यायुक्तःस्वयंहरिः ॥ ४ ॥ यत्फलंपृथिवीदानेकुरुक्षेत्रेरविग्रहे ॥ विष्णुचक्रांकि
तेदेहेदर्शनात्फलमाप्नुयात् ॥ ५ ॥ चक्रांकितशरीरस्यगृहेमुक्तिःकरेस्थिता ॥
आरण्यगमनंशुद्धंकिंपुनःपुण्यभूमिका ॥ ६ ॥ ततःप्रभृतिदेवाद्याःसनकादिमु
नीश्वराः ॥ देहंकुर्वंतिसततंशंखचक्रादिलांछितं ॥७॥ **तथाचमहारामायणे** ॥
सर्वैर्गुणैरपिचसंयमनेमयुक्तानिष्कल्मषास्सकलसिद्धिकराश्चनित्यं ॥ येनांकिता
धनुःशरैर्नचमंत्रराजस्योपासकानस्वजनारघुनंदनस्य ॥ ८ ॥ नित्यंप्रियेप्रियत
रोरघुनंदनस्यबाणोधनुर्विमलमंत्रषडक्षरश्च ॥ बालेतदेवसकलेषुचचिन्हमध्ये



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्रेष्ठंमहद्धनुःशरंसमुपासकेषु ॥ ९ ॥ ध्यानेजपेविविधपाठतराश्चनित्यंपूजारता
षडधिकादशभिःप्रकारैः ॥ एतद्धनुःशरविनांकितएवकुर्याद्रामःप्रसीदतिकदापि
नचैवतेषां ॥ १० ॥ श्रीरामसंस्कारविवर्जितायेनिष्पुच्छशृंगाःपशवोनरास्ते ॥
शक्तानवेदाअभिवर्णितुंवैत्वत्तोमयाख्यातमविस्तरेण ॥११ ॥ इतिशंखचक्रादि
माहात्म्यं॥ **॥अथनामकरणमाहात्म्यम् ॥ पाद्मे॥** ॥नवेदयज्ञाध्ययनैर्नव्रतै
श्चोपवासकैः ॥ प्राप्यतेवैष्णवंलोकंविनादास्येनकुत्रचित् ॥ १ ॥ तस्माद्दास्यंह
रेर्भक्त्याभजेतानन्यमानसः ॥ प्राप्नोतिपरमांसिद्धिंकर्मबंधविमोचनीं ॥ २ ॥
**॥ हारीते ॥** ॥ यस्यवैवैष्णवंनामनास्तिचेत्तुद्विजन्मनः ॥ अनामकःसविज्ञे
यःसर्वकर्मसुगर्हितः ॥ ३ ॥ दास्यमेवपरंधर्मोदास्यमेवपरंहितं ॥ दास्येनैवभवे
न्मुक्तिरन्यथानिरयंव्रजेत् ॥ ४ ॥ विष्णोर्दास्यंपराभक्तिर्येषांतुनभवेत्क्वचित् ॥

For Private And Personal

तेषामेवहिसंसृष्टंनिरयंब्रह्मणानृप ॥ ५ ॥ नारायणस्यदासायेनभवंतिनराध
माः ॥ जीवंतएवचांडालाभविष्यंतिनसंशयः ॥६॥ ॥तथाच पाद्मे ॥ ॥ ब्र
ह्माचेंद्रश्चरुद्रश्चयमोवरुणएवच ॥ नारायणस्यदासास्तेयेचान्येंडस्यमध्यगाः
॥ ७ ॥ यःपरःपुरुषोविष्णुर्नारायणउदाहृतः ॥ दासभूतमिदंतस्यब्रह्माद्यैःसक
लंजगत् ॥ ८ ॥ सृष्टंपुनस्तथासर्गस्तस्मान्नारायणोच्यते ॥ तस्यदास्यंचतुर्थ्यै
तंमंत्रेप्रोक्तंतुपार्वति ॥ ९ ॥ ॥ **इतिनामकरणमाहात्म्यं** ॥ **हारीते** ॥ अ
**थमंत्रमाहात्म्यम्**॥ ॥श्रीरामायनमोह्येतत्तारकंब्रह्मनामकम् ॥ नाम्नांविष्णोः
सहस्राणांतुल्यएवमहामनुः ॥ १ ॥ ॥ **अनंतसंहितायां** ॥ ॥ रामनामप्र
भावेणस्वयंभूःसृज्यतेजगत् ॥ बिभर्तिसकलंविष्णुःशिवःसंहरतेपुनः ॥ २ ॥
॥ **महारामायणे** ॥ ॥ परमेश्वरनामानिसंत्यनेकानिपार्वति ॥ परंतुरामनामै



For Private And Personal

वसर्वेषामुत्तमोत्तमम् ॥३॥ ॥नृसिंहपुराणे॥ ॥ कर्माधीनंजगत्सर्वंविष्णुना
निर्मितंपुरा ॥ तत्कर्मकेशवाधीनंरामनाम्नाविनश्यति ॥ ४ ॥ प्रणवंकेचिदाहुर्वैद्वि
जंश्रेष्ठंतथापरे ॥ तत्तुतेनामवर्णाभ्यांसिद्धिमाप्नोतिमेमतम्॥५॥रामनाम्नः परंकिं
चित्तत्वंवेदेस्मृतिष्वपि ॥ संहितासुपुराणेषुनैवतंत्रेषुविद्यते ॥६॥ ॥सनत्कुमा
रसंहितायां॥ ॥ श्रीरामेतिपरंजाप्यंतारकंब्रह्मसंज्ञकम् ॥ ब्रह्महत्यादिपापघ्न
मितिवेदविदोविदुः॥७॥ ॥वाराहपुराणे॥ ॥इदंशरीरंशतसंधिजर्जरंपतत्यव
श्यंपरिणामदुर्वहम् ॥ किमौषधंपृच्छसिमूढदुर्मतेनिरामयंरामरसायनंपिब ॥
८॥ श्रीरामनामाखिलमंत्रबीजंसंजीवनंयस्यहृदिप्रविष्टं॥हलाहलंवाप्रलयानलं
वामृत्युमुखंवाविषदः कुतोस्ति ॥९॥ ॥इतिमंत्रमाहात्म्यं॥ ॥अथपंचसंस्का
रमाहात्म्यं ॥ पाद्मेभगवद्वाक्यं॥ ॥कृष्णायुधांकितंविप्रंतुलसीमाल्यभूषितम्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



॥ दृष्ट्वानिंदापरोयस्तुसबोद्धोवैष्णवोनहि ॥ १ ॥ धारयंतिनयेमालांहैतुकाःपाप
बुद्धयः ॥ नरकान्ननिवर्त्ततेदग्धाःकोपाग्निनाहरेः ॥२॥ त्रयोवेदास्त्रयोदेवास्तिस्त्रः
संध्यास्त्रयोग्नयः ॥ तुलसीधारिणंविप्रंसदाकुर्वंतिमंगलम् ॥ ३ ॥ तुलसीकाष्ठसं
भूतामालाधार्यासदामया ॥ मयातुपूज्यातुलसीमयाधार्यासदैवहि ॥४॥ तुलसी
कर्णयोःकंठेअर्द्धबाव्होः करद्वये॥अशुचिर्वादुराचारीमामेवैतिनसंशयः॥५॥निवे
द्यकेशवेमालांतुलसीकाष्ठसंभवां॥वहतेयोनरोभक्त्यातस्यवैनास्तिपातकम् ॥६
प्रायश्चित्तंनतस्यास्तिनाशौचंतस्यात्रिग्रहे॥तुलसीकाष्ठसंभूतांमालांयोवहतेनरः
॥७॥इत्यादियथाक्रमंपंचसंस्कारमाहात्म्यं ॥अथधारणाविधिरुच्यते॥तत्रा
दौऊर्ध्वपुंड्रधारणविधिःपाद्मे ॥ पुंड्राणांधारणार्थायगृह्णीयाच्छ्वेतमृत्तिकाम्॥
श्रीरंगेवृषभाद्रौचश्रीकूर्मेयादवाचले ॥ १ ॥ प्रयागेनारासिंहाद्रौवाराहेतुलसी



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वने ॥ द्वारवत्यांशुभेरम्येवासुदेवह्रदिस्तथा ॥ २ ॥ सिंधुतीरेचवल्मीकेहरिक्षेत्रे
विशेषतः ॥ विष्णोः पादोदकंयत्रप्रवाहयतिनित्यशः ॥ ३ ॥ गृहीत्वामृत्तिकां
भक्त्याविष्णुपादजलैः सह ॥ धृत्वापुंड्राणिचांगेषुविष्णुसायुज्यमाप्नुयात्॥४॥
मत्प्रियार्थंशुभार्थंवारक्षार्थंचतुरानन ॥ मत्पूजाहोमकालेचसायंप्रातःसमाहितः
॥५॥ द्वादशपुंड्राणिविप्राणांवैष्णवानांतथैवच ॥ पुंड्रंधारयेद्विधिवद्धरिद्रासंयुतं
शुभम्॥ ६ ॥ चत्वारिभूभृतांप्रोक्तंपुंड्राणिद्वेविशांस्मृतम् ॥ एकंपुंड्रंतुनारीणांशू
द्राणांतुविधीयते ॥ ७ ॥ ललाटेहृदिबाहौचचतुःपुंड्राणिधारयेत् ॥ ललाटेहृद
येद्वेतुभालेत्वेकंविधीयते ॥ ८॥ ऊर्ध्वपुंड्रंललाटेतुसर्वेषांप्रथमंस्मृतम् ॥ मूर्त्त
योवासुदेवाद्याश्चतुःपुंड्रेषुधारयेत् ॥ ९ ॥ द्वयोर्गोविंदकृष्णौतुएकंनारायणंधरे
त् ॥ एवंपुंड्रविधिः प्रोक्तः सर्वेषांगिरिजेमया ॥ १० ॥ आरभ्यनासिकामूले

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



ललाटांतेलिखेन्मृदम् ॥ नासिकायास्त्रयोभागानासामूलमितिस्मृतम् ॥ ११ ॥
॥ मरीचिराह ॥ ॥ चतुरंगुलमूर्ध्वाग्रंद्व्यंगुलंविस्तृतंतथा ॥ द्विजःपुंड्रमृजुं
सौम्यंसांतरालंतुधारयेत् ॥ १२ ॥ द्व्यंगुलंत्र्यंगुलंवापिमध्येछिद्रंप्रकल्पयेत्॥
द्व्यंगुलंपार्श्वमेकंतुऊर्द्ध्वपुंड्रस्यलक्षणम् ॥ १३॥ शांतिदानामिकाप्रोक्तामध्यमायुः
करीभवेत्॥अंगुष्ठापुष्टिदाप्रोक्तातर्जनीमोक्षदायिनी॥१४॥इतिपुंड्रधारणविधिः॥
॥ अथउर्द्धपुंड्रधारणं ॥ तत्रतिलकायद्रव्यंतारपुटितंरामेतिबीजंविलि
ख्यमूलमंत्रेणदशवारंअभि मंत्र्य मूर्त्तिपंजरेणवामूलेनद्वादशतिलकान्
विधाय॥तथाहि पद्मपुराणे॥ ॥ललाटेकेशवंध्यायेन्नारायणमथोदरे॥वक्षस्थ
लेमाधवंचगोविंदंकंठकूबरे॥१॥विष्णुंचदक्षिणेकुक्षौतद्बाहौमधुसूदनम्॥त्रिविक्र
मंकंधरायांवामनंवामपार्श्वके ॥२॥ श्रीधरंवामबाहौचहृषीकेशंतुकंधरे ॥ पृष्ठे



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तुपद्मनाभंचत्रिकेदामोदरंन्यसेत् ॥३॥ ॥ तथाच ॥ ॥ श्रीरामायुधंधनुर्बा
णंधारयेच्चैवमूर्द्धनि ॥ ललाटेकेशवायेतिधारयेच्चतुरंगुलं ॥ चतुश्चक्रधरंदेवंशुद्ध
जाम्बूनदप्रभम्॥ १ ॥ नाभौनारायणायेतिधारयेच्चदशांगुलम्॥चतुःशंखधरंदेवं
नीलजीमूतसन्निभम् ॥२॥ हृदयेमाधवायेतिधारयेदंगुलाष्टकम् ॥ इंदीवरदल
श्यामंचतुर्हस्तैर्गदाधरम् ॥ ३॥ गोविंदायेतिकंठेचधारयेच्चतुरंगुलं ॥ चतुर्भुजं
धनुष्मंतंचंद्रभासासमन्वितम् ॥४॥ विष्णुंचदक्षिणेकुक्षौधारयेच्चदशांगुलम्॥ॐ
चतुर्हलधरंदेवंपद्मकिंजल्कसन्निभम् ॥५॥ मधुसूदनंबाहुमध्येधारयेदंगुलाष्टकम्
॥ चतुर्मुशलधरंदेवमरविंदाभमेवच॥६॥त्रिविक्रमंदक्षिणांगेधारयेच्च तुरंगुलम् ॥
चतुःखड्गधरंदेवंज्वालानलसमप्रभम् ॥ ७ ॥ वामनंवामकुक्षौचधारयेच्चदशांगुल
म्॥चतुर्वज्रधरंदेवंतरुणादित्यसंनिभम् ॥८॥ श्रीधरंबाहुमध्येतुधारयेदंगुलाष्ट

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

 कम् ॥ पट्टीशायुधधरंदेवंपुंडरीकाभमेवच ॥ ९ ॥ हृषीकेशंचवामाङ्गेधारयेच्चतुरं 
गुलम् ॥ चतुर्मुद्गरधरंदेवंविद्युद्वर्णवर्चसम् ॥१०॥ पृष्ठेतुपद्मनाभंचधारयेच्चतुरंगु
लम् ॥ सर्वायुधधरंदेवंसहस्रादित्यसन्निभम् ॥११॥ दामोदरंकंठपृष्ठेधारयेच्चतु
रंगुलम् ॥ चतुःपाशधरंदेवमिंद्रगोपसमप्रभम् ॥१२॥ करंप्रक्षाल्यतोयेनवासुदेवे
तिमूर्द्धनि ॥ स्पर्शेत्सर्वाणिपुंड्राणितत्तन्मंत्रैःपृथक्पृथक् ॥१३॥ ॥ इतिऊर्ध्वं
**पुंड्रंधारयेत् ॥ ततस्तन्मध्येश्रियंधारयेत् ॥ तथाचईश्वरसंहितायाम् ॥**
विष्णुदेहपरामृष्टंयश्चूर्णंशिरसावहेत् ॥ सोऽश्वमेधफलंप्राप्याविष्णुलोकेमहीयते
॥ १ ॥ विष्णवर्पितंचक्रबाणंहरिद्राचूर्णमुत्तमम् ॥ लक्ष्मीनिवाससिद्ध्यर्थंदीपा
कारंसुशोभितम् ॥२॥ हरिद्रेणतुचूर्णेनकुंकुमेनसुगंधिना ॥ ऊर्ध्वपुंड्रस्यमध्येतु 
लक्ष्मीस्थानंप्रकल्पयेत् ॥३॥ ऊर्ध्वपुंड्रस्यमध्येतुरजनीचूर्णमुत्तमम् ॥ लक्ष्मीरू

For Private And Personal

पधरंनित्यमन्यद्रव्यंनधारयेत् ४ श्यामंशांतिकरंप्रोक्तंरक्तंवश्यकरंतथा॥श्रीकरं प्रीतमित्याहुःश्वेतंमोक्षप्रदंशुभम् ॥५॥ ॥ तत्रलक्ष्मीद्वादशनाम ॥ ॥ श्रीदे वीप्रथमंनामद्वितीयममृतोद्भवा ॥ तृतीयंकमलाप्रोक्ताचतुर्थंचंद्रशोभिनी ॥ ६ ॥ पंचमंतुवरारोहाषष्ठंतुहरिवल्लभा ॥ सप्तमंविष्णुपत्नीस्यादष्टमंवैष्णवीतथा॥७॥ नवमंशार्ङ्गिणीप्रोक्तादशमंदेवदेविच ॥ एकादशंतुलक्ष्मीःस्याद्द्वादशंसुरसुंदरी ॥ ॥ ८ ॥ एवंध्यात्वांतरालेषुहरिद्राधारयेच्छ्रियम् ॥ ९ ॥ इतिऊर्ध्वपुंड्रंधारयेत् ॥

अथनिषेधलक्षणंपाद्मे॥ ॥वर्तुलंतिर्यगच्छिद्रंह्रस्वंदीर्घंतनुतरं ॥ वक्रंत्रिरूपं बद्धाग्रंछिन्नमूलंपदच्युतम् ॥१॥ अशुभ्रंरूक्षमासक्तंतथानांगुलिकल्पितम् ॥ वि गंधंचाप्यसंख्यंचपुंड्रमाहुरनर्थकम् ॥२॥ इतिनिषेधलक्षणं ॥ इतिऊर्ध्वपुंड्रधा रणाविधिः ॥ ॥ अथशंखचक्रादिप्रार्थना ॥ ॥ स्फुरत्सहस्त्रारिशिखातितो

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



वसुदर्शनंभास्करकोटितुल्यम् ॥ सुरद्विषःप्राणविनाशविष्णोश्चक्रंसदाहंशरणं
प्रपद्ये॥१॥विष्णोर्मुखोत्थानिलपूरितस्ययस्यध्वनिर्दानवदर्पहंता॥ तंपांचजन्यं
शशिकोटिशुभ्रंशंखंसदाहंशरणंप्रपद्ये ॥२॥ हिरण्मयींमेरुसमानसारांकौमोदकीं
दैत्यकुलैकहंत्रीं॥ वैकुंठवामाग्रकराभिमृष्टांगदांसदाहंशरणंप्रपद्ये ॥ ३ ॥ रक्षो
सुराणांकठिनोग्रकंठछेदक्षरच्छोणितदिग्धधारम् ॥ तंनंदकंनामहरेःप्रदीप्तंखड्गं
सदाहंशरणंप्रपद्ये ॥४॥ यज्ज्यानिनादश्रवणात्सुराणांचेतांसिनिर्मुक्तभयानिस
द्यः॥ भवंतिदैत्याशनिबाणवर्षंशार्ङ्गंसदाहंशरणंप्रपद्ये ॥ ५ ॥ शंखंचचक्रंचग
दांचनंदकंशार्ङ्गंदधत्यद्भुतविश्वरूपम् ॥ तंपुंडरीकाक्षमुदारशक्तिंविष्णुंसदाहंश
रणंप्रपद्ये ॥६॥ **इतिशंखचक्रादिप्रार्थयेत्॥ अथस्वात्मभावना॥** ॥ अह २९
मस्मिनारायणदासदासदासस्यदासस्यचदासदासः॥ अन्येभ्यईशोजगतांनरं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

द्रतस्मादहंधन्यतरोस्मिल्लोके ॥ १ ॥ मज्जन्मनः फलमिदंमधुकैटभारेमत्प्रार्थ
नीयमदनुग्रहएषएव ॥ त्वद्भृत्यभृत्यपरिचारकभृत्यभृत्यभृत्यस्यभृत्यइतिमां
स्मरलोकनाथ ॥२॥ नाहंविप्रोनचनरपतिर्नापिवैश्योनशूद्रोनाहंवर्णोनिचगृहप
तिर्नोवनस्थोयतिर्वा ॥ किंतुप्रोद्यन्निखिलपरमानंदपूर्णामृताब्धेर्लक्ष्मीभर्तुःपद
कमलयोर्दासदासानुदासः ॥ ३ ॥ ॥ **इतिस्वात्मानंभावयेत् ॥ अथतुलसी
साधारणं ॥** ॥ तुलसीकाष्ठसंभूतेमालेविष्णुजनप्रिये ॥ त्वांधारयाम्यहंकंठे
कुरुमांहरिवल्लभम् ॥१॥इतितुलसींधारयेत् ॥ **ततोमंत्रंविधिपूर्वकंसंस्मरेत् ॥**
तत्रादौप्राणायामम् ॥ रामितिबीजंजपन् पूरकं १६ कुंभकं ६४ रेचकं ३२ ॥
अथवामूलमंत्रंजपन् पूरकं ९ कुंभकं ३६ रेचकं १८ इतिसर्वत्रप्राणायामः ॥
॥ **तथाचकर्मकांडे** ॥ ॥आदावंतेतथामध्येप्राणायामंसमाचरेत्॥ ॥यद्वा॥

For Private And Personal

॥ प्राणायामंत्रयंकृत्वापश्चान्न्यासंसमाचरेत् ॥ ॥ **तथाच** ॥ ॥ कनिष्ठानामि
कांगुष्ठैर्नासाग्रंकरपीडनं ॥ ॐकारमुद्रासाप्रोक्तायतेश्चब्रह्मचारिणः॥१॥पंचांगुली
भिर्नासाग्रपीडनंप्रणवेविधौ ॥ मुद्रेयंसर्वपापघ्नीवानप्रस्थगृहस्थयोः ॥ २ ॥
**अथकुशपवित्रधारणाविधिः ॥** ॥ अंगुल्यग्रेतपोवृद्धिर्मध्येचायुश्चसंश्रियः॥
मूलेकर्मविनाशःस्यात्तस्मान्मूलेनधारयेत् ॥३॥ **॥अथआचमनाविधिः ॥तदुक्तंहारीते ॥** ॥ आचम्यातःपरंमौनीप्राङ्मुखोवाप्युदङ्मुखः ॥ नामाभिःके
शवाद्यैश्चयथासंख्यमुपस्पृशेत् ॥ १ ॥ द्विराचम्यंतुसर्वत्रविण्मूत्रोत्सर्जनेत्रयं ॥
पवित्रपाणिराचम्यपश्चात्संध्यांसमाचरेत् ॥२॥ **॥ संध्याभाष्ये ॥** ॥ गोक
र्णाकृतिहस्तेनमाषमात्रंजलंपिबेत् ॥ तन्न्यूनमधिकंपीत्वासुरापानसमंभवेत्॥३
अंगुष्ठाग्रंसमाकुंच्यमध्यमामध्यपर्वणि ॥ गोकर्णतद्धिविज्ञेयंसर्वेष्वाचमनेष्वि



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ह ॥४॥ तर्जन्यंगुष्ठसंयोगेराक्षसीमुद्रिकाभवेत ॥ राक्षसीमुद्रयापीतंतत्तोयंरुधि
रंभवेत् ॥५॥ पूर्वाचमनममृतंसोमपानंतथोत्तरे ॥ दक्षिणेरक्तपानंतुसुरापानंतुप
श्चिमे ॥६॥ ॥ **तथाच बृहद्ब्रह्मसंहितायां** ॥ ॥ रेतोमूत्रशकृन्मोक्षेह्यधोवा
युर्विमोक्षणे ॥ परिश्रमेनृतेहासेउच्छिष्टजनसंगमे ॥७॥ उच्छिष्टस्पर्शनेमेध्यादर्श
नेचाश्रुपातने ॥रक्तकेशमलस्पर्शेजृंभायांस्वप्नदर्शने॥८॥छिक्काष्ठीवनसंक्रोधेष्वा
चम्यशुचिकाम्यया ॥ उपक्रमोपसंहारेकर्मणोनीविबंधने ॥ ९ ॥ केशवादिभिरा
चम्यसद्यःशुद्धिमवाप्नुयात् ॥ अकृत्वाचमनंविप्रोनकर्मफलमाप्नुयात् ॥ १० ॥
यथाऽभिषेकजाशुद्धिर्बहिरेवप्रजायते॥ मंत्रपूतमलैस्तद्वदाचम्यह्यंतराशुचिः ॥
॥ ११ ॥ ॥ **ततोऽघमर्षणंकुर्यात** ॥ **अथाघमर्षणसंध्यामहंकरिष्ये** ॥
इतिसंकल्पः ॥ अत्राचमनंप्राणायामंचकृत्वामूलमंत्रंपठित्वादिणाक्षहस्तेनजलं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



गृहीत्वादक्षिणनासांसंस्पृश्यदक्षिणावर्त्यंभूमौनिःक्षिपेत् ॥ ॐनमःइतिमंत्रेणां
जलिनाजलमादायवामहस्तेनदक्षिणहस्तस्थंजलमाछाद्याष्टवारं ॥ ॐजानकी
वल्लभायस्वाहा ॥ इतिमंत्रेणमूलेनवाअभिमंत्र्यपिबेत् ॥ पुनस्तथैवत्रिराचम्यां
जलिनाजलमादाय दक्षिणहस्तस्थंवामेनाछाद्य ॥ ॐनमोभगवतेरघुनंदनायर
क्षोघ्नविशदायमधुरप्रसन्नवदनायामिततेजसेबलायश्रीरामायविष्णवेनमः ॥ॐ
क्लींतजसेरांतारकब्रह्मस्वाहा ॥ इतिमंत्रेणसकृदभिमंत्र्यतज्जलंवामहस्तेनिक्षि
प्यतदंगुलिविवरगतजलबिंदुभिरात्मानंतेनैवमंत्रेणमूलेनवाअष्टवारं मार्जयि
त्वा॥ पुनस्तथैवजलमादायदक्षिणहस्तस्थंवामेनाछाद्य॥ ॐनमोभगवतेइतिस
कृत् अभिमंत्र्य दक्षिणनासारंध्रेणाघ्रायतज्जलंशरीरांतर्गतंसर्वकलुषमाक्षालि
तं ॥ ततकृष्णवर्णध्यात्वा वामनाड्यानिर्गतंपुनर्हस्तमागतमितिविभाव्यवाम



For Private And Personal

भागे कल्पितायां वज्रशिलायां ॥ ॐ रःअस्त्रायफट् इतिमंत्रेणगाढमास्फालयै
त् ॥ **॥ इत्यघमर्षणं ॥** ॥ अहंरामोनचान्योऽस्मिब्रह्मैवाहंनशोकभाक् ॥
सच्चिदानंदरूपोहंनित्यमुक्तस्वभाववान् ॥१॥ **॥ इतिभावयेत् ॥** ॥ ॐअ
पवित्रःपवित्रोवासर्वावस्थांगतोपिवा॥ यःस्मरेत्पुंडरीकाक्षंसबाह्याभ्यंतरःशुचिः
॥१॥ **॥ इतिमार्जनं ॥** ॥ ॐविष्णुःॐविष्णुःॐविष्णुः॥ **॥इत्याचमनं॥**
**अथभूतशुद्धिः**॥श्रीरामाराधनयोग्यतासिद्ध्यर्थंभूतशुद्धिमहंकरिष्ये ॥इतिसंक
ल्पः॥ ॥ अत्राचमनंप्राणायामंचकुर्यात् कच्छपिमुद्रयाहृदिस्थितंदीपकर्णिका
कारंजीवज्योतिः परंतेजसिलीनंविचिंत्यतत्रैवपृथिव्यप्तेजोवाय्वाकाशाहंकारम
हत्तत्त्वप्रकृत्येतानितत्त्वानिलिंगानिविचिंत्यचवामकुक्षौकृष्णवर्णंपापपुरुषरूपं
ध्वात्वा ॥ **॥ यंरंलंवंशंहं ॥** ॥ यमितिमंत्रेणवायुबीजेनशरीरपापशोषणं ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

बृ. वे. रमितिमंत्रेणअग्निबीजेनशरीरपापदहनं ॥ लमितिमंत्रेणपृथिविबीजेनदेहंदृढंकृ रा.प.
त्वावमितिमंत्रेणवरुणबीजेनभस्मोच्चाटनं ॥ शमितिमंत्रेणचंद्रबीजेनचंद्रमामृत
३२ वृष्टिकरणंतेनशरीरोत्पत्तिंविभाव्य ॥ हमितिमंत्रेणकाशबीजेनदेहसुषिराणि
भावयेत् ॥ एकैकबीजंजपेत् ॥ पूरकं१६कुंभकं६४रेचकं३२एवंषट्प्राणायाम
द्वयंकुर्यात् ॥ ॥ **इतिभूतशुद्धिः** ॥ ॥ अथप्राणप्रतिष्ठामंत्रस्यब्रह्मविष्णुमहे
श्वराऋषयः ऋग्यजुःसामानिछंदांसिप्राणशक्तिर्देवताआंबीजंह्रींशक्तिःक्रौंकी
लकं प्राणप्रतिष्ठार्थेजपेविनियोगः ॥ ॥ **इतिसंकल्पः**॥ ॥अत्राचमनंप्राणा
यामंचकारयेत् ॥ ॐप्राणप्रतिष्ठामंत्रायनमःमूर्ध्नि ॥ ॐब्रह्मविष्णुमहेश्वरायऋ
षयेनमः भ्रुवोर्मध्ये ॥ ॐऋग्यजुःसामानिछंदांसिनमःमुखेप्राणशक्तिर्देवतायै ३२
नमांहृदि ॥ ॐआंबीजायनमःदक्षिणस्तने ॥ ॐह्रींशक्तयेनमःवामस्तने ॥ ॐ

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

क्रौंकीलकायनमः नाभौ ॥ ॐप्राणप्रतिष्ठायैनमः पादयोः जपेविनियोगायनमः स
र्वांगे ॥ अत्रमूलेनकरन्यासंहृदयादिन्यासंचकारयेत् ॥ ततोहृदिहस्तंदत्वा॥ॐ
आंर्हींक्रौंयंरंलंवंशंषंसंहंहंसः सोहंममप्राणाइहतिष्ठंतुस्वाहा ॥ ॐआंर्हींक्रौंयं
रंलंवंशंषंसंहंहंसः सोहंममजीवइहस्थितःस्वाहा ॥ ॐआंर्हींक्रौंयंरंलंवंशंषंसंः
सोहंममसर्वेंदियाणिवाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणाइहागत्यसुखंचिरंतिष्ठंतुस्वा
हा ॥ ततोहृदयंस्पृष्ट्वाद्वादशप्रणवावृत्त्यायथोचितंसंस्कारान्भावयेत् ॥इतिप्राण
प्रतिष्ठाविधिः॥ ॥**अथगायत्रीविधिः॥** ॥आदौऋष्यादिकन्यासंकरशुद्धिस्ततः
परं॥हृदादिव्यापकन्यासमक्षरन्यासमेवच॥ १ ॥ध्यानंपूजाजपश्चैवततोनत्वावि
सर्जनम् ॥२॥न्यासंविनाभवेन्मूकःसुप्तःस्यादासनंविना॥ऋषिदेवताछंदोभिःप
रित्यक्तोभुजंगमः॥३॥ ॥**अथसंकल्पावाहनपुनःसंकल्पऋष्यादिन्यासकर**

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



न्यासांगन्यासपदन्यासाक्षरन्यासध्यानजपविसर्जनं यथाक्रमंप्रदर्श्यते
ॐ उत्तिष्ठंतुमहाभूतायेभूताभूमिपालकाः॥भूतानामविरोधेन ब्रह्मकर्मसमाचरेत्
॥१॥ॐ अस्यश्रीरामगायत्रीमंत्रस्यवामदेवऋषिर्गायत्रीछंदः॥ श्रीजानकीवल्ल
भोदेवता॥श्रीरामेतिबीजं॥दाशरथायेतिशक्तिः॥गायत्र्यावाहनेजपेविनियोगः॥
इतिसंकल्पः॥ अत्राचमनंप्राणायामंचकृत्वा॥ ॐ श्रीरामगायत्रींसूर्यमंडलादावा
हयाम्यहंदेवीं॥ ॐ आगच्छवरदेदेवित्रिपदेरामवादिनि॥ गायत्रीछंदसांमातारा
मयोनेनमोस्तुते ॥१॥ ॐ तेजोसिशुक्रमस्यमृतमसिधामनामासिप्रियंदेवानाम
नाधृष्टंदेवायजनमसि ॥ ॐ तेजसेशुक्रवर्णमंत्रस्यभावनंमानसप्रियंदेवानामधि
ष्ठायजन्मस्य इत्यावाहनं॥ ॥ श्रीसीतायैनमः॥ इतिमंत्रेणासनंदद्यात् ॥ ततःपा
द्याघ्योचमनीपूजांमानसींचकारयेत्॥ ॥अथमुद्राविधिःततोमुद्रांप्रदर्शयेत्



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सुमुखंसम्पुटंचैववितितंविस्तृतंतथा॥एकमुखंचद्विमुखंत्रिमुखंचचतुर्मुखं॥१॥ पंच
मुखंषण्मुखंचऊर्ध्वांजलिमधोमुखं ॥ शकटंयमपाशंचग्रथितंसन्मुखोन्मुखं ॥२॥
प्रलंबंमुष्टिकंचैवमत्स्यंकूर्मंवराहकं ॥ सिंहाक्रांतंमहाक्रांतंमुद्गरंपल्लवंतथा ॥३॥ए
तामुद्राश्चतुर्विंशागायत्र्यादौप्रकीर्तिताः ॥ एतामुद्रानजानातिगायत्रीनिष्फला
भवेत् ॥४॥ इतिमुद्राविधिः॥ **अथगायत्री** ॥ ॐ दाशरथायविद्महे ॥ सीतावल्ल
भायधीमहि ॥ तन्नोरामःप्रचोदयात् ॥ ॐ कारस्यजानकीऋषिर्गायत्रीछंदः ॥
श्रीरामोदेवता॥ रांबीजंनमःशक्तिः ॥ रामायकीलकं ॥ श्रीरामप्रीत्यर्थेजपेविनि
योगः ॥ इतिसंकल्पः ॥ अत्राचमनंप्राणायामंचकृत्वा ॥ ॐ कारस्यजानकीऋ
षयेनमःशिरसि॥ गायत्रीछंदसेनमःमुखे॥ श्रीरामोदेवतायैनमःहृदि ॥ रांबीजा
यनमःनाभौ॥नमःशक्त्यैनमःगुह्ये॥ रामायकीलकायनमःपादयोः॥ जपेविनियो

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



गायनमःसर्वांगे॥ इतिऋष्यादिन्यासः॥ ॐदाशरथायअंगुष्ठाभ्यांनमः॥ ॐविद्म
हेतर्जनीभ्यांनमः ॥ ॐसीतावल्लभायमध्यमाभ्यांनमः ॥ ॐधीमहिअनामिका
भ्यांनमः॥ ॐतन्नोरामःकनिष्ठिकाभ्यांनमः॥ ॐप्रचोदयात्करतलकरपृष्ठाभ्यांन
मः॥इतिकरन्यासः॥ॐदाशरथायहृदयायनमः॥ ॐविद्महेशिरसेस्वाहा ॐसीता
वल्लभायशिखायैवषट्॥ॐ धीमहिकवचायहुं॥ॐ तन्नोरामःनेत्रत्रयायवौषट्॥ॐ
प्रचोदयात्अस्त्रायफट्॥ इतिहृदयादिन्यासः ॥ॐदाशरथायमूर्ध्नि ॥ ॐविद्महेभ्रु
वोर्मध्ये ॥ ॐसीतावल्लभायहृदि ॥ ॐधीमहिनाभौ ॥ ॐतन्नोरामलिंगे॥ ॐ
प्रचोदयात्पादयोः ॥ इतिपदन्यासः ॥ ॐदाकारंपादतलयोः॥ ॐ शकारंपादां
गुष्ठयोः ॥ ॐरकारंगुल्फयोः ॥ ॐ थाकारंजंघयोः ॥ ॐ यकारंजान्वोः ॥ ॐव
कारंऊर्वोः ॥ ॐद्मकारंगुह्ये ॥ ॐहेकारंलिंगे ॥ ॐसीकारंकट्यां ॥ ॐताकारंना



For Private And Personal

भौ ॥ ॐवकारंउदरे ॥ ॐह्लकारंस्तनयोः ॥ ॐभाकारंहृदये॥ॐयकारंकंठे॥ ॐ धीकारंमुखे ॥ ॐमकारं तालुदेशे ॥ ॐ हिकारंनासिकायां ॥ॐ तकारंनेत्रयोः॥ ॐन्नोकारं भ्रुवोर्मध्ये ॥ॐराकारंललाटे ॥ ॐमकारंपूर्वदिशि ॥ ॐप्रकारं दक्षिणदिशि ॥ ॐ चोकारंपश्चिमदिशि॥ॐ दकारं उत्तरदिशि ॥ ॐ याकारंमूर्ध्नि ॥ व्यंजनतकारंसर्वव्यापकं॥ इत्यक्षरन्यासः॥ ततआचमनं प्राणायामंच॥ ॥अथध्यानं ॥ ॥ॐ हस्तद्वयेनकमलेधारयंतींस्वलीलया ॥ हार नूपुरसंयुक्तांलक्ष्मींदेवींविचिंतयेत् ॥ १ ॥ ॐ वंदेलक्ष्मींपराशिवमयींशुद्धजांबूनदाभांतेजोरूपां कनकवसनांसर्वभूषोज्ज्वलांगीम् ॥ बिजापूरंकनककलशंहेमपद्मंदधानामाद्यांशक्तिंसकलजननींविष्णुवामांकसंस्थां॥ २ ॥ इतिध्यानं ॥तत्रप्रातःकाले॥ ब्रह्मरूपिणी रक्तवर्णाश्वेतवर्णहंसवाहनी ॥ मध्याह्नेरुद्ररूपिणीधूम्रवर्णाश्वेतवर्ण

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



वृषभवाहनी ॥ सायाह्ने वैष्णवी श्वेतवर्णा पीतवर्णगरुडवाहनी ॥ अर्द्धरात्रौ तुरिया
स्वरूपधारिणी पीतवर्णा॥ एवं चतुर्ष्वपि कालेषु श्रीलक्ष्मीं ध्यात्वा॥ **तथाच**॥ उत्त
मा दृष्टनक्षत्रा मध्यमा लुप्ततारका॥ कनिष्ठा उदिते भानौ प्रातःसंध्या त्रिधा मता॥१॥
अर्द्धार्कमंडले श्रेष्ठा मध्यमास्तगते रवौ॥ कनिष्ठा दृष्टनक्षत्रा सायंसंध्या त्रिधा मता २
प्रातश्च प्राङ्मुखं कृत्वा मध्यान्हे च उदङ्मुखं ॥ सायं पश्चिमदिक्कैव एवं संध्यां समा
चरेत॥३॥ प्रातर्नाभौ करं कृत्वा मध्याह्ने हृदि संस्थितम्॥ सायं नासागतं कृत्वा त्रिसं
ध्यं जपलक्षणम्॥४॥ प्रातरूर्ध्वं करश्चैव मध्याह्नमुपपाणिना॥ सायमधोमुखं कुर्यात्
त्रिसंध्यं जपलक्षणं॥५॥ अंगुष्ठायां तु मोक्षार्थं तर्जन्यां शत्रुसाधनम्॥ मध्यमायां ध
नवृद्धिः शांतिकर्मण्यनामिका ॥६॥ कनिष्ठा व्यभिचारे तु जपकर्मणि सिध्यति॥ एवं
ध्यात्वा जपेन्मंत्रं सहस्त्रं तु दिने दिने ॥ त्रिशतं वा जपेन्मंत्रं शतं वाथ यथाक्रमः ॥७॥



For Private And Personal

ॐदाशरथायविद्महेसीतावल्लभायधीमहि।।तन्नोरामःप्रचोदयात् ।। इतिमंत्रंजपे
त् ।।जपांतेचाचमनंषडंगन्यासंचकुर्यात् ।।ॐ वाक् ॐ वाक् ॐ वाक् ॐ प्राणः
प्राणः ॐ चक्षुःचक्षुःॐश्रोत्रंश्रोत्रं ॐललाटे ॐनाभौॐहृदि ॐकंठे ॐशिरसि
ॐशिखायां ॐकवचे एवंषडंगन्यासं ततःप्राणायामंचकृत्वापुनःअष्टौमुद्रांप्रदर्श
येत्।। सुरभिर्ज्ञानवैराग्यंयोनिःकूर्मोऽथपंकजं।। लिंगनिर्वाणशंखाश्चजपांतेऽष्टौप्र
कीर्तिताः ।।१।। ततःस्तुतिमुच्चारयेत्।। ।।जयतुजयतुलक्ष्मीर्लक्षणालंकृतांगी
जयतुजयतुपद्मापद्मसद्माद्विवंद्या ।। जयतुजयतुविद्याविष्णुवामांकसंस्थाजय
तुजयतुसम्यक्सर्वसंपत्करीश्रीः ।। १ ।। जयतुजयतुदेवीदेवसंघाभिपूज्या
जयतुजयतुभद्राभार्गवीभाग्यरूपा ।। जयतुजयतुनित्यानिर्मलज्ञानवेद्या ज
यतुजयतुसत्यासर्वभूतांतरस्था ।। २ ।। जयतुजयतुरम्यारत्नगर्भांतरस्था ज

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



यतुजयतुशुद्धाशुद्धजाम्बूनदाभा ॥ जयतुजयतुकांताकांतिमद्भासितांगी जय
तुजयतुशांताशीघ्रमागच्छसौम्या ॥३॥ अथविसर्जनं ॥ ॥उत्तरेशिखरेजाता
भूम्यांपर्वतवासिनि ॥ वैष्णवैःसमनुज्ञातागच्छदेवियथासुखं ॥४ ॥ पाहिदेविवे
दमातःसूर्यसाहृग्बलक्रमात् ॥ प्रविश्यपरमात्मानंज्योतीरूपंनमोस्तुते ॥ ५ ॥
एवंत्रिष्वपिकालेषुगायत्र्यावाहनादिकंविधाय ध्यानंकृत्वा ॥ श्रीजानकीवल्ल
भायनमःइतिसमर्पयेत् ॥ ॐनमोभगवतेतुभ्यंविष्णवेप्रभविष्णवे ॥ गृहाणेदं
मयादत्तंदेवदेवनमोस्तुते ॥१॥ अत्राचमनंषडंगन्यासंप्राणायामद्वयंचकारयेत् ॥
इतिसंध्याविधिः॥अथतर्पणम् ॥ॐ अस्मद्गुरूंस्तर्पयामि॥ॐ अस्मत्परमगुरूं
स्तर्पयामि॥ॐ अस्मत्सर्वगुरूंस्तर्पयामि ॥ ॐ नमोभगवतेविष्णवेसर्वभूतात्मने ३६
॥वासुदेवायसर्वात्मनेसंयोगपीठात्मनेनमः॥संयोगपीठात्मकंरामंसंतर्पयामि इ

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तिपीठदेवान्संतर्पयामि॥मूलमंत्रमुच्चार्य श्रीरामंसंतर्पयामि॥इतिअष्टाविंशतिवा
रंतीर्थजलेनसंतर्पयामि॥सीतादींश्चसंतर्पयामि श्रीसीतायैस्वाहा इतिसीतांतर्प
यामि॥ॐ लंलक्ष्मणायनमः इतिलंलक्ष्मणंतर्पयामि॥ॐ भंभरतायनमः इतिभं
भरतंतर्पयामि॥ ॐ शंशत्रुघ्नायनमःइतिशंशत्रुघ्नंतर्पयामि ॥ ॐ शंशार्ङ्गायनमःइ
तिशंशार्ङ्गंतर्पयामि॥ॐ शंशरेभ्योनमःइतिशंशरांस्तर्पयामि॥मूलेनांजलिंदत्वा॥
ॐ हंहनुमतेनमःइतिहंहनुमंतंतर्पयामि ॥ ॐ वंवरुणायनमःइति वरुणंतर्पयामि
॥ॐ संसूर्यायनमः इतिसूर्यंतर्पयामि॥ॐ नमोरामायश्रीजानकीवल्लभायनमः ॥
इतिमंत्रेणत्रिवारंतर्पयेत्॥ मातृपितृपितृंश्चतर्पणानिददाम्यहंसर्वतीर्थानिसूर्यमं
डलादागतानिश्रीसूर्यमंडलंगच्छंतु ॥ **अथ सूर्यगायत्री** ॥ ॐ भास्करायवि
द्महे ॥ ॐ महातेजायधीमहि ॥ ॐ तन्नोसूर्यःप्रचोदयात् ॥ **इतिसूर्यगायत्री**

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



॥ ॐ श्रींविष्णुतेजसेमहाज्वालायमणिकुंडलायस्वाहा ॥ इतिसूर्यमंत्रः॥इति तर्पणं ॥ एवंसंध्यावंदनादिकंसमाप्यमंत्रंविधिपूर्वकंसाधयेत् ॥ ॐ अस्यश्री षडक्षरश्रीराममंत्रस्यश्रीजानकीऋषिर्गायत्रीछंदः॥ श्रीरामोदेवतारांबीजंनमः शक्तिःरामायकीलकंइष्टार्थेजपेविनियोगः॥इतिसंकल्पः ॥ अत्राचमनंप्राणाया मंचकारयेत् ॥ ॐजानकीऋषयेनमःशिरसि ॥ गायत्रीछंदसेनमःमुखे ॥ श्रीरा मोदेवतायैनमःहृदि ॥ रांबीजायनमःनाभौ ॥ नमःशक्तयेनमःगुह्ये ॥ रामाय कीलकायनमःपादयोः ॥ जपेविनियोगायनमः सर्वाङ्गे॥ इतिऋष्यादिन्यासः॥ ॐरांरींरूंरैंरौंरः ॥ ॐरांअंगुष्ठाभ्यांनमः ॥ ॐरींतर्जनीभ्यांनमः ॥ ॐरूंमध्य माभ्यांनमः ॥ ॐरैंअनामिकाभ्यांनमः ॥ ॐरौंकनिष्ठिकाभ्यांनमः ॥ ॐरःक रतलकरपृष्ठाभ्यांनमः ॥ इतिकरन्यासः ॥ ॐरांहृदयायनमः ॥ ॐ रींशिरसे



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्वाहा ॥ ॐ रूंशिखायैवषट् ॥ ॐरैंकवचायहुं ॥ ॐरौंनेत्रत्रयायवौषट् ॥ ॐ
रःअस्त्रायफट् ॥ इत्यंगन्यासः ॥ ततःतालत्रयंकृत्वामूलमंत्रेणदशदिग्बंधनंकृ
त्वा ॥ ॐरांरक्षतुप्राच्यां ॥ ॐरांरक्षतुदक्षिणे॥ॐरांरक्षतुप्रतीच्यां ॥ ॐरांरक्षतुउ
दीच्यां ॥ ॐरांरक्षतुआग्नेय्यां ॥ ॐरांरक्षतुनैर्ऋत्यां ॥ ॐरांरक्षतुवायव्यां ॥
ॐरांरक्षतुईशान्यां ॥ ॐरांरक्षतुऊर्ध्वं॥ॐरांरक्षतुअधोमां॥ ॥इतिदिग्बंधन
म् ॥ ॐरांनमोमूर्ध्नि ॥ ॐरामायनमःनाभौ ॥ ॐ नमोनमःपादयोः ॥ इति
पदन्यासः ॥ ॐरांनमोमूर्ध्नि॥ ॐरांनमोभ्रुवोर्मध्ये ॥ ॐमांनमोहृदि ॥ ॐयंन
मोनाभौ ॥ ॐनंनमोगुह्ये ॥ ॐमंनमःपादयोः ॥ इत्यक्षरन्यासः ॥ ततोरां
इतिबीजंषोडशवारंजपन् ॥ पूरकम् ॥ १६ ॥ चतुःषष्टिवारंकुंभकम् ॥ ६४ ॥
द्वात्रिंशद्वारंजपन् रेचकम्॥ ३२॥ इतिप्राणायामं ॥ ॥ अथध्यानम् ॥ ॥ध्या

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



येत्कल्पतरोर्मूलेसुवर्णमयमंडपे ॥ पुष्पकाख्येविमानेतुसिंहासनपरिच्छदे॥१॥
पद्मेवसुदलेदेवमिंद्रनीलमणिप्रभम् ॥ वीरासनसमारूढंदिव्यमुद्रोपशोभितम्॥
॥ २ ॥ वामेचजानकीयुक्तंदक्षिणेलक्ष्मणयुतम् ॥ सर्वधर्मेणसंपन्नंध्यात्वारामं
जपेन्मनुं ॥ ३ ॥इतिध्यानं॥ ॥अथमंत्रोदाहरणं॥ अगस्त्यसंहितायामग
स्त्यवाक्यम् ॥ ॥ मंत्ररूपंप्रवक्ष्यामिशृणुनारदतत्पर ॥ रकारादिमकारांतमं
त्रंषड्वर्णसंयुतम् ॥ १ ॥ षडक्षरात्मकंमंत्रंतारकंब्रह्मवाचकम् ॥ राजेंद्रंराघवंरामं
राजानंरघुनंदनम् ॥ २ ॥ राजीवलोचनंवंदेरावणारिंरघूत्तमम् ॥ रामचंद्रंरघुप
तिंप्रपद्येरावणांतकम् ॥ ३ ॥ माधवंमन्मथाधीशंमथुरेशंमहत्तमम् ॥ मायातीतं
महाविष्णुंमापातिंप्रणमाम्यहम् ॥ ४ ॥ यज्ञाधीशं यज्ञयोनिंयज्ञेशंयज्ञभावनम्
॥ प्रपद्येयज्ञभोक्तारंयज्ञपालनतत्परम्॥ ५ ॥ नरोत्तमंनराधीशंनौमिनागारिवा



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हनम् ॥ नारायणनमस्तुभ्यंनारदादेरभीष्टदम् ॥ ६ ॥ महादेवायमहतेमहेशा
यमहात्मने ॥ मंत्ररूपायरामायमहेशायनमोनमः ॥ ७ ॥ इत्येतद्रामचंद्रस्यमं
त्रराजात्मकंस्तवम् ॥ जन्ममृत्युजराव्याधिघोरसंसारतारकम् ॥ ८ ॥ अगस्त्य
नारदप्रोक्तंयःपठेच्छृणुयाद्यदि ॥ सयातिपरमंस्थानंरामभद्रप्रसादतः ॥९॥ अ
ष्टोत्तरंसहस्त्रंवात्रिशतंवाथशक्तितः॥ रामचंद्रप्रसादार्थंपठेत्स्तोत्रंतुभक्तितः॥१०
नरोनलिप्यतेपापैर्भुक्तिंमुक्तिंचविंदति॥इतिस्मृत्वाजपेन्मंत्रंषट्सहस्त्रंदिनेदिने ॥
॥ ११ ॥ **तथाच** ॥ मंत्रराजंप्रतिदिनंषट्सहस्त्रंजपेद्बुधः ॥ अष्टोत्तरंसहस्त्रंवा
त्रिशतंवाथशक्तितः ॥ १ ॥ ॐरांरामायनमः ॥ इतिमंत्रः ॥ पश्चाद्रामगायत्री
न्यासंप्राणायामंचकृत्वायथासंख्यंगायत्रींजपेत् ॥ तत्रप्रथमतःषट्लक्षणपुर
श्चरणंतद्दशांशेनहोमंहोमदशांशेनतर्पणंतर्पणदशांशेनमार्जनंमार्जनदशांशेनब्रा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



ह्मणवैष्णवभोजनंदद्यात् ॥ **तत्रजपलक्षणम्** ॥ वाचिकस्त्वेवमेकंस्यादुपां
शुशतमुच्यते ॥ सहस्त्रंमानसंप्रोक्तंत्रिविधाजपलक्षणम् ॥ १ ॥ ॥ **तथाच** ॥
उच्चैर्जपादुपांशुश्चसहस्त्रंफलमुच्यते ॥ मनसाचमनुंजाप्यमनंतंफलमुच्यते ॥
॥ २ ॥ पूर्वाश्रमंतुरीयंतुनारीसंगंविवर्जयेत् ॥ जपेमौनंतथायोगोब्रह्मचर्यं
दमस्तथा ॥३॥ कामंक्रोधंतथालोभंमोहमानमदांस्त्यजेत् ॥ मत्सरद्वेषरौक्षोक्ति
निद्रालस्यादिवर्जयेत् ॥४॥ स्नात्वाशुक्लांबरधरःकृतकृत्योयथाविधिः ॥ तदेहय
त्नेनचवैसारूप्यत्वमवाप्नुयात्॥५॥इतिमंत्राराधनविधिः॥ ॥ **अथपूजाविधि**
**र्निरूप्यते॥तथाचशांडिल्यस्मृतौ** ॥प्रातःकृत्यमकृत्वातुयःपूजयतिकेशवं ॥
तस्यपूजानिष्फलास्यान्मद्यस्पर्शंपयोयथा ॥१॥ तस्मात्पूर्वंप्रयत्नेननित्याचारं
समाचरेत ॥२॥ चरणपद्मसंभूतंशालग्रामस्यचोदकम् ॥ यःपिबेद्भक्तितोनित्यं



For Private And Personal

विष्णुलोकंसगच्छति॥३॥एवंध्यात्वामानसोपचारैःसंपूज्य पुनःगुरुदत्तमंत्रेणैव प्रत्यक्षं पूजांकुर्यात् ॥ॐ क्रींरांरामायनमःइत्यष्टाक्षरमंत्रेण॥आसनंपाद्यंअर्घंआ चमनंस्नानंवस्त्रंआभरणंयज्ञोपवीतंगंधंपुष्पंधूपंदीपंनैवेद्यंतांबूलं आर्त्तिकंकल्प यामि ॥ इतिपूजयेत् ॥ तथैवच ॥ श्रीसीतायैस्वाहा ॥ इतिसीतामंत्रेणसीतां पूजयेत् ॥ एवंलक्ष्मणादीनामपितत्तन्मंत्रैःपूजांकुर्यात् ॥ ॐ लंलक्ष्मणायनमः ॥ ॐ भंभरतायनमः ॥ ॐ शंशत्रुघ्नायनमः ॐ शंशार्ङ्गायनमः ॥ ॐ शंशरेभ्योन मः॥ॐहंहनुमतेनमः॥ॐसांगायसपरिवारायसवाहनायसायुधायश्रीजानकीव ल्लभाय गंधंपुष्पंधूपंदीपंनैवेद्यंताम्बूलंसमर्पयामि॥इति जानकीनाथायपुष्पांज लिंदत्वा ॥ बलिर्वीभीषणोभीष्मः कपिलोनारदोऽर्जुनः ॥ प्रन्हादोजनकोव्यास श्चांबरीषस्तथैवच ॥१॥ विष्वक्सेनोद्धवोक्रूरोध्रुवोथहनुमांस्तथा ॥ अत्रिर्वसिष्ठ

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



श्च्यवनःसनकाद्याःशुकादयः ॥२॥रामचंद्रप्रसादंवैसर्वेगृह्णंतुवैष्णवाः ॥३॥ इति
हरिपादोदकंस्वनिकटवर्तिभ्यःसर्वेभ्योवैष्णवेभ्योदद्यात् ॥ **इतिप्रधानपूजा** ॥
॥ ॐ आयताभ्यांविशालाभ्यांशीतलाभ्यांकृपानिधे ॥ करुणापूर्णनेत्राभ्यांकुरु
निद्रांजगत्पते ॥१॥ ॥ **इतिशयनमंत्रः** ॥ ॥ ॐ उत्तिष्ठोत्तिष्ठश्रीरामउत्तिष्ठग
रुडध्वज॥उत्तिष्ठजानकीकांतत्रैलोक्यंमंगलंकुरु॥१॥उत्तिष्ठोत्तिष्ठभद्रंतेउत्तिष्ठज
गदीश्वर ॥ त्वयिचोत्थायमानेतुउत्थितंभुवनत्रयम् ॥२॥ **इतिउत्थापनमंत्रः**
॥ **अथावाहनादिमुद्रा** ॥ आवाहनीस्थापनीसन्निहितीसन्निरुद्धीसन्मुखीअव
गुंठनीशकलीकृत ॥ धेनुशंखचक्रगदापद्मशार्ङ्गशरकौस्तुभवनमालायोनिनम
स्काराः ॥ इतिमुद्राः ॥ श्रीरामपूजामध्येक्रियंते ॥ **यद्वा** ॥ शंखचक्रगदापद्मं
शार्ङ्गंमुशलमेवच ॥ पाशांकुशौवैनतेयंश्रीवत्संकौस्तुभंतथा ॥१॥ वीक्षणंप्रोक्षणं



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ताडणंअवगुंठनंशकलीकृतम् ॥ धेनुमुद्रामहामुद्राप्रणामीकिरणंतथा ॥२ ॥ आ
सनंस्वागतंपाद्यमर्घ्यमाचमनीयकम् ॥ मधुपर्काचमनस्नानवस्त्राभरणानिच ॥
॥३॥ सुगंधंसुमनोधूपंदीपंनैवेद्यवंदनम् ॥ प्रार्थनाचरणार्चनाचअर्पणानिचषो
डश॥४॥ **अथविधिपूर्वकं अर्चाविधिर्निरूप्यते ॥ तदुक्तंपाराशरे ॥** अथ
यागविधिंवक्ष्येसंस्कारांतरमुत्तमम्॥अभिवाद्यनमस्कृत्यप्राणिपत्यततोगुरुम् ॥
॥ १ ॥ तस्यप्रसादंलब्धंवैगृहीत्वाविग्रहंहरेः ॥ श्रीभूमिलीलासहितंसायुधंस
परिच्छदं ॥ २ ॥ अर्चयेत्प्रयतोनित्यंयथाकालमतंद्रितः ॥ अप्सुव्योम्नितथा
र्चायांवन्हौहृदितथागुरौ ॥ ३ ॥ **पाद्मे** ॥ जम्बुद्वीपेमहापुण्येवर्षेवैभारतेशु
भे ॥ अर्चायांसन्निधोविष्णुर्नेतरेषुकदाचन ॥४ ॥ तस्मात्तुभारतेवर्षेमुनिभिस्त्रि
दशैरपि ॥ सेवितंऋषिभिर्देवितपोयज्ञक्रियादिभिः ॥५ ॥ ऐंद्रद्युम्नेतथाकूर्मेसिं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



हार्दौबदरीवने ॥ कृतशौचेप्रयागेचपौंड्रकेचैवदंडके ॥ ६ ॥ वैकुंठाद्द्रौपदेचैवश्वेता
दोकरवीरके ॥ कांच्यामनंतशयनेश्रीरंगेभैरवाचले ॥ ७ ॥ नारायणाचलेसौम्ये
वाराहेवामनाश्रमे ॥ एवमाद्याःस्वयंव्यक्ताःसर्वकामफलप्रदाः॥८॥ अथवास्था
पनंविष्णोःस्वगृहेतद्विशिष्यते॥सिकतादारुलोहाद्यैःकृत्वाप्रतिकृतिंहरेः॥९॥वि
ष्णुयामले॥मृदाचरम्यरत्नेनताम्रेणरजतेनवा॥कृत्वादारुमयंबिंबमर्चनंकांचने
नवा ॥१०॥ पुण्यंशतगुणंदद्यादेतेषामुत्तरोत्तरं॥यस्मिन्सन्निहितोविष्णुः स्वयमे
वनृणांभुवि॥११॥**भागवते**॥शैलीदारुमयीलौहीलेप्यालेख्याचसकती॥मणि
मयीमनोमयीप्रतिमाष्टविधास्मृता॥१२॥ ॥अन्ये ॥ श्रीभूमिसहितंदेवंकारये
च्छुभविग्रहं॥एकादश्यांशुक्लपक्षेद्वादश्यांश्रवणेपिवा १३ रोहिण्यामिंदुवारेवात
थैवाहितीयेशुभे॥ कार्तिकेमार्गशीर्षेवानभस्येचोत्तरायणे॥१४॥शुभेन्हिशुभलग्ने ४१

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वाशुभग्रहनिरीक्षणे॥प्रतिष्ठाकारयेद्विद्वान्यथोक्तविधिनाद्विजः॥१५॥शालग्राम
शिलायांतुपूजनंपरमात्मनः॥ कोटिकोटिगुणाधिक्यंभवेदत्रनसंशयः ॥१६॥न
जपोनाधिवासश्चनचसंस्थापनक्रिया॥ शालिग्रामार्चनेविष्णुस्तास्मिन्सान्निहितः
सदा ॥१७॥ मूर्त्तीनांचहरेःस्वस्ययस्यप्रीतिरनुत्तमा ॥तस्यामेवतुतांध्यात्वापू
जयेत्तद्विधानतः ॥ १८ ॥ खंडितंस्फुटितंभिन्नमग्निदग्धंतथैवच ॥ शालिग्राम
शिलाभूतशैलदोषोनविद्यते ॥१९॥ सूतकेमृतकेवापिविष्णुंनित्यंतथार्चयेत् ॥
शालिग्रामशिलांस्पृष्ट्वासद्यएवशुचिर्भवेत् ॥२०॥ मद्भक्तिबलमाश्रित्यमद्भ
क्तोदीक्षितोयदि ॥ नत्यजेन्ममकर्माणिसूतकेमृतकेपिवा ॥ २१ ॥ अशुचिर्वादु
राचारीसत्यशौचविवर्जितः ॥ शालग्रामशिलांस्पृष्ट्वासद्यएवशुचिर्भवेत् ॥२२॥
ब्रह्मक्षत्रियवैश्यानांशूद्राणामथवापिवा ॥ शालिग्रामेधिकारोस्तिनचान्येषांक

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



दाचन॥२३॥अतिपापसमाचाराःकर्मण्यनधिकारिणः ॥ शालिग्रामार्चकायेवैनै
वयांतियमालयं ॥ २४ ॥ ॥ इतिअर्चाविग्रहविधिः ॥ ॥ गोविंदवल्लभे
देविजगच्चैतन्यरूपिणि ॥ स्नापयामिजगद्धात्रिविष्णुभक्तिप्रदायिनि ॥ १ ॥ इ
तितुलसीस्नानमंत्रः॥अथतुलसीविधिः ॥ मह्यंप्रसीदजननिसर्वसौभाग्यव
र्द्धिनि ॥ आधिव्याधिहरेदेवितुलसित्वांनमोस्तुते ॥ २ ॥ ॥ इतिनमस्कार
मंत्रः ॥ तुलस्यमृतनामासिसदात्वंकेशवप्रिये ॥ केशवार्थेचिनोमित्वांवरदाभ
वशोभने ॥ ३ ॥ कुसुमैःपारिजाताद्यैःसुगंधैरपिकेशवः ॥ त्वांविनानचतृप्तः
स्याच्चिनोमित्वामतःशुभे ॥ ४ ॥ त्वयाहीनंमहाभागेसमस्तंकर्मनिष्फलं ॥
अतस्तुलसिदेवित्वांचिनोमिवरदाभव ॥ ५ ॥ पत्रंचयुगलंयुक्तंमंजरीमध्यसं
स्थितं ॥ तुलसींविष्णुप्रीत्यर्थंददामिविष्णवेसदा ॥ ६ ॥ मरीचिसंहितायां॥



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इदमन्नःहवैतुलस्यासंस्कृतःपुरुषाराधनार्हंभवतितस्मात् तुलसीमिश्रितःस
मर्पणंकुर्यात् तुलसीरहितः निवेदितंयोभुंक्तेसकिल्बिषःसर्वंभुंजानोपापीयान्
भवति ससर्वलोकगर्हितोभवति सकृष्णोऽभक्तोभवति इतिश्रुतेः॥तथाचपाद्मे
॥विष्णोर्निवेदनार्थान्नंतुलसीमिश्रितंनचेत् ॥ तत्सर्वंराक्षसैर्नीतं पूतंमंत्रपदैरपि
॥७॥ इतितुलसीविधिः ॥ अथपुष्पग्रहणविधिः ॥ नशुष्कैःपूजयेद्देवंनपुष्पै
र्धरणीगतैः ॥ नविदीर्णदलैःपुष्पैर्नाशुभैर्नाघकाशिभिः ॥ १ ॥ पूतगंधीन्यगंधी
निअल्पगंधीनिवर्जयेत् ॥ नग्राह्यंकरवीरैस्तुकुसुमैरर्चयेद्धरिं ॥ २ ॥ कुशपुष्पस
मिद्वारिब्राह्मणः स्वयमाहरेत् ॥ शूद्रानीतंस्त्रियानीतंकर्मकुर्वन्व्रजेदधः ॥ ३ ॥
करानीतंपरानीतंशूद्रानीतंतथैवच ॥ एरंडपत्रैर्वानीतंपत्रंपुष्पंविवर्जयेत् ॥ ४ ॥
विष्णुधर्मोत्तरे ॥ ॥ श्रीशस्याराधनार्थायकुर्यात्पुष्पस्यसंचयम्॥तुलसीबिल्व

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



पत्राणिदूर्वांकौशेयमेवच ॥५॥ विष्णुक्रांतंमरुबकंकारुवेलंदमनंतथा ॥ औशीरं
जातिकुसुमंकुंदंचैवकुरुंडकम् ॥ ६ ॥ शमिंचंपकदंबंचचूतपुष्पंचमाधवीं ॥
पुन्नागंबकुलंनागकेशराशोकमल्लिकं ॥ ७ ॥शतपत्रंचहारीतंकरवीरंचवर्जयेत ॥
॥ नीलोत्पलंशतपलंचसंध्याव्रतंचकैतकम् ॥ ८ ॥ घटजलस्थंपद्मंचसर्वाणिज
लजानिच ॥ तत्तत्कालोद्भवंपुष्पंगृहीत्वागृहमाविशेत् ॥ ९ ॥ इतिपुष्पग्रहणवि
धिः ॥ **अथचरणोदकविधिः** ॥उदकंचंदनंचक्रंशंखंचतुलसीदलं॥घंटानादंशि
लाताम्रमष्टाभिश्चरणोदकम् ॥१॥ ॥ **तथाच हारीते** ॥ ॥गंडकीगोमतीचक्रं
तुलसीताम्रभाजनं ॥ घंटानादंशंखतोयमष्टमंचानुलेपनम् ॥ २ ॥ सर्वेषामप्य
लाभेतुशंखएकोविशिष्यते ॥ शंखोदकंसदापूतमतिप्रियतमंहरेः ॥ ३ ॥ पंचसं ४३
स्कारयुक्तानांवैष्णवानांविशेषतः ॥ ग्रहार्चनविधानेतुशंखंघंटांविवर्जयेत् ॥४॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पाद्यार्घ्याचमनस्नानपात्राणिस्थाप्यपूजयेत् ॥ पूरयित्वाशुभजलंपात्रेषुकुसुमै
र्युतं ॥ ५ ॥ द्रव्याणिनिःक्षिपेत्तेषुमंगलानियथाक्रमं ॥ द्रव्याणामप्यलाभेतुतुल
सीपत्रंनिःक्षिपेत् ॥ ६ ॥ उद्धरण्याततोदद्यात्पाद्यार्घ्याचमनंहरेः ॥ स्नानपात्रो
दकेनाद्यंस्नापयेत्कमलापतिम् ॥७॥ कस्तूरीतिलकंगंधंपुष्पाणिसुरभीणिच ॥ व
स्त्रंचैवोपवीतंचदद्यादाभरणानिच॥८॥पुनरर्घ्यादिकंदत्वाधूपंदीपंनिवेदयेत् ॥ गु
ग्गुलुमहिषाख्यंच शालनिर्यासमेवच॥९॥अगरुंदेवदारुंचउशीरंश्रीफलंतथा ॥
ह्रीबेरंचंदनंमुस्तादशांगंधूपमुच्यते ॥१०॥गवाज्येनसमंयोज्यदद्याद्धूपंसुवासि
तं ॥ संयोज्यवन्हिनादीपंभक्त्याविष्णोर्निवेदयेत् ॥ ११ ॥ गुडपायससर्पींषिश
ष्कुल्यापूपमोदकान् ॥ संयावदधिसूपांश्चनैवेद्यंसतिकल्पयेत् ॥१२॥ दत्वाचम
नमुच्छेषंविष्वक्सेनायकल्पयेत्॥मुखवासंसुरभिमत्तांबूलाद्यमथार्पयेत्॥१३॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

 आदौचतुष्पादतलेचकृत्वाद्विनाभिदेशेमुखमंडलैकम् ॥ सर्वांगदेशेषु चसप्तवारंत 
थार्तिकंभक्तजनैस्तुदेयम् ॥१४॥ सर्वैश्चवैष्णवैर्मंत्रैःकुर्यात्पुष्पांजलिंतथा॥प्रणमे
 च्चततोष्टांगंभत्क्याविष्णोर्निवेदयेत् ॥१५॥ स्तवैरुच्चावचैस्स्तोत्रैःपौराणैःप्राकृतै
रपी ॥ स्तुत्वाप्रसीदभगवन्निातिवंदेतदंडवत् ॥ १६॥ शिरोमत्पादयोःकृत्वाबाहु
भ्यांचपरस्परं॥ प्रपन्नंपाहिमामीशभीतंमृत्युग्रहार्णवात्॥१७॥पद्भ्यांकराभ्यांजानु
भ्यामुरसाशिरसातथा ॥मनसावचसादृष्ट्याप्रणामोष्टांगउच्यते॥१८॥प्रसार्यबा
हूपादौचबद्धेनांजलिनासह ॥ स्तुवंस्तुतिभिरेवंतुप्रणामोदीर्घउच्यते ॥ १९ ॥
अग्रेपृष्ठेतथावामेसमीपेगर्भमंदिरे॥ जपहोमनमस्कारंनकुर्यात्केशवालये॥२०॥
वस्त्रप्रावृतदेहस्तुयोनरःप्रणमेत्तुमां ॥ स्त्रीत्वंतुजायतेमूर्खःसप्तजन्मनिभामिनि 
॥ २१ ॥ एकहस्तप्रणामंचएकांचैवप्रदक्षिणाम् ॥ अकालेदर्शनंविष्णोर्हंतिपुण्यं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पुराकृतम् ॥२२ ॥ तथाच ॥ दुर्गसंसारकांतारमपारमधिधावताम् ॥ एकोवि
षणुनमस्कारोमुक्तितीरस्यदेशिकः ॥२३॥ इतिचरणोदकादिविधिः ॥ ॥ अथ
पूजामंत्रविधिः ॥ तथाच ॥ ॥पंचरात्रविधानेनयथावैखानसेनवा॥स्मृत्युक्ते
नाथवाकुर्यात्क्रियालोपंनकारयेत् ॥ १ ॥ ॥ तत्रादौश्रुत्युक्तप्रमाणं ॥ ॐ
सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् ॥ सभूमिंसर्वतस्पृत्वात्यतिष्ठद्दशांगुल
म ॥१॥ ॥ इत्यावाहनं ॥ ॥ ॐ पुरुषएवेदंसर्वंयद्भूतंयच्चभाव्यं ॥ उता
मृतत्वस्येशानोयदन्नेनातिरोहति ॥ इत्यासनम् ॥ २ ॥ ॐ एतावानस्यमहि
माऽतोज्यायांश्चपूरुषः ॥ पादोऽस्यविश्वाभूतानि त्रिपादस्यामृतंदिवि ॥ इति
पाद्यम् ॥ ३ ॥ ॐ त्रिपादूर्ध्वउदैत्पुरुषःपादोस्येहाभवत्पुनः ॥ ततोविष्वङ्व्य
क्रामत्साशनानशनेअभि ॥ इत्यर्घम्॥४॥ ॐ ततोविराडजायतविराजोअधि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



पूरुषः ॥ सजातोअत्यारिच्यतपश्चाद्भूमिमथोपुरः॥ ॥ इत्याचमनं॥ ॥५॥ॐ
तस्माद्यज्ञात्सर्वहुतःसंभृतम्पृषदाज्यं ॥ पशूंस्तांश्चक्रेवायव्यानारण्यान्ग्राम्या
श्चये ॥ ॥ इतिस्नानम् ॥ ॥ ६ ॥ ॐ तस्माद्यज्ञात्सर्वहुतऋचःसामानिज
ज्ञिरे ॥ छंदांसिजज्ञिरेतस्माद्यजुस्तस्मादजायत ॥ ॥ इतिवस्त्रम् ॥ ॥७॥
ॐ तस्मादश्वाअजायंतयेकेचोभयादतः ॥ गावोहजज्ञिरेतस्मात्तस्माज्जाताअ
जावयः ॥ ॥ इतियज्ञोपवीतं ॥ ॥ ८ ॥ ॐ तंयज्ञंबर्हिषिप्रौक्षन्पुरुषंजातम
ग्रतः ॥ तेनदेवाअयजंतसाध्याऋषयश्चये ॥ ॥ इतिगंधम् ॥ ॥ ९॥ ॐ य
त्पुरुषंव्यदधुःकतिधाव्यकल्पयन् ॥ मुखंकिमस्यासीत्किंबाहूकिमूरूपादाउच्ये
ते॥ इतिपुष्पम्॥ १०॥ॐ ब्राह्मणोस्यमुखमासीद्बाहूराजन्यःकृतः॥ऊरूतदस्य 
यद्वैश्यःपद्भ्यांशूद्रोअजायत ॥ इतिधूपम् ॥ ११ ॥ ॐचंद्रमामनसोजातश्च



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

क्षोस्सूर्योअजायत ॥ श्रोत्राद्वायुश्चप्राणश्चमुखादग्निरजायत ॥ इतिदीपं ॥
॥ १२ ॥ ॐ नाभ्याआसीदन्तरिक्ष ँ शीर्ष्णोद्यौःसमवर्तत ॥ पद्भ्यांभूमिर्दि
शःश्रोत्रात्तथालोकाँअकल्पयन् ॥ इतिनैवेद्यं ॥१३॥ ॐ यत्पुरुषेणहविषादे
वायज्ञमतन्वत॥वसंतोऽस्यासीदाज्यंग्रीष्मइध्मःशरद्धविः ॥ इतिनमस्कारः
॥ १४ ॥ ॐ सप्तास्यासन्परिधयस्त्रिःसप्तसमिधःकृताः ॥ देवायद्यज्ञंतन्वाना
अबध्नन्पुरुषंपशुम् ॥ इतिप्रदक्षिणा ॥ १५ ॥ ॐ यज्ञेनयज्ञमयजन्तदेवास्ता
निधर्माणिप्रथमान्यासन् ॥ तेहनाकंमहिमानःसचन्तयत्रपूर्वेसाध्याःसंतिदेवाः
॥ इतिविसर्जनं ॥१६॥ ॐअद्भ्यःसंभृतपृथिव्यैरसाच्चविश्वकर्मणः समवर्तता
ग्रे ॥ तस्यत्वष्टाविदधद्रूपमेतितन्मर्त्यस्यदेवत्वमाजानमग्रे ॥१७॥ ॐ वेदाहमे
तंपुरुषंमहान्तमादित्यवर्णंतमसःपरस्तात्॥ तमेवविदित्वातिमृत्युमेतिनान्यःपं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



थाविद्यतेऽयनाय॥१८॥ॐप्रजापतिश्चरतिगर्भेअंतरजायमानोबहुधाविजायते
॥तस्ययोनिम्परिपश्यन्तिधीरास्तस्मिन्हतस्थुर्भुवनानिविश्वा ॥१९॥ॐ योदेवे
भ्यआतपतियोदेवानांपुरोहितः॥पूर्वोयोदेवेभ्यो जातोनमोरुचायब्राह्मणे॥२०॥
ॐ रुचंब्राह्मंजनयंतोदेवाअग्रेतदब्रुवन् ॥ यस्त्वेवंब्राह्मणोविद्यात्तस्यदेवाआस
न्वसे॥२१॥ॐश्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमाश्विनौव्यात्त
म्॥इष्णन्निषाणामुमइषाणसर्वलोकंमइषाण ॥२२॥इतिश्रुत्युक्तपूजामंत्राः॥
अथपंचरात्रोक्तपूजामंत्राः॥ ॥त्वंपुरासागरोत्पन्नोविष्णुनाविधृतःकरे॥नमंति
सर्वदेवास्तुपांचजन्यनमोस्तुते॥१॥इतिशंखप्रार्थना॥ सर्वनादमयीघंटादेवदे
वस्यवल्लभा॥ त्वांविनादेविसर्वेषांशुभंभवतिनशोभने॥२॥ इतिघंटाप्रार्थना
मंत्रः॥उत्तिष्ठोत्तिष्ठश्रीराम उत्तिष्ठजानकीपते॥ उत्तिष्ठकमलाकांतत्रैलोक्यंमंगलं



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कुरु॥३॥उत्तिष्ठोत्तिष्ठभद्रंतेउत्तिष्ठजगदीश्वर ॥ त्वयिउत्थायमानेतुउत्थितंभुवन
त्रयम् ॥४॥ ॥इतिउत्थापनं॥ ॥ आगच्छभगवन्विष्णोस्वस्थानात्परमेश्व
र ॥ अहंपूजांकरिष्यामिसदात्वंसंमुखोभव ॥५॥ ॥इत्यावाहनं॥ ॥सिंहा
सनेसुवर्णस्यनानारत्नोपशोभिते ॥ अनंतफणपत्रस्थउपविश्यासनेप्रभो ॥६॥
॥इत्यासनं ॥ ॥स्नानार्थंस्वच्छतोयानिगंधपुष्पयुतानिच॥पाद्यंगृहाणदेवेश
भक्तानुग्रहकारक ॥७॥ ॥इतिपाद्यं॥ ॥शंखतोयंसमानीतंगंधपुष्पादि
वासितम् ॥ अर्घ्यंगृहाणदेवेशप्रीत्यर्थंमेसदाप्रभो ॥८॥ ॥इत्यर्घ्यं॥ ॥ॐ
विष्णुः ॐविष्णुः ॐविष्णुः ॥इत्याचमनं॥ ॥दधिदुग्धमधुसर्पिःशर्कराच
तथाप्रभो ॥ समर्पयामिदेवेशप्रीत्यर्थंप्रतिगृह्यताम् ॥ ९ ॥ इतिमधुपर्कादि
स्नानं ॥ ॥ गंगासरस्वतीतापीपयोष्णीनर्मदार्कजा ॥ तज्जलैःस्नापितोदेवतेन

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



शांतिंकुरुष्वमे ॥ १० ॥ **इतिस्नानं** ॥ ॥ गंगातोयंसमानीतंसुवर्णकलशेधृ
तम् ॥ आचम्यदेवदेवेशप्रीत्यर्थंप्रतिगृह्यताम् ॥११॥ **इत्याचमनं** ॥ ॥ शी
तवातोष्णसंत्राणेपरलज्जानिवारणे ॥ सुवेषेधारितेयस्माद्वाससीप्रतिगृह्यता
म् ॥ १२ ॥ **इतिवस्त्रं** ॥ ॥ ब्रह्मणानिर्मितंसूत्रंविष्णुग्रंथिसमन्वितम् ॥ इदं
यज्ञोपवीतंचगृह्यतांतुजनार्दन ॥ १३ ॥ **इतियज्ञोपवीतं** ॥ ॥ ॐविष्णुः ३॥
**इत्याचमनं** ॥ किरीटंकुंडलंहारंकंकणांगदनूपुरम् ॥ नानारत्नमयंत्वंगेभूषणं
प्रतिगृह्यताम् ॥१४॥ **इतिभूषणं** ॥ ॥ मलयाचलसंभूतंशीतमानंदवर्धनम्॥
काश्मीरघनसाराढ्यंचंदनम्प्रतिगृह्यताम् ॥१५॥ **इतिचंदनं**॥ ॥ ब्रह्मार्पितं
समज्योतिःशक्राद्याःसर्वदेवताः ॥ वस्त्रंगृहाणदेवेशप्रीत्यर्थंमेसदाप्रभो ॥ १६॥
॥ **इतिउत्तरीयवस्त्रं** ॥ ॥ ॐ विष्णुः ॥३॥ **इतिआचमनं** ॥ नानाविधानिपु



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ष्पाणिऋतुकालोद्भवानिच ॥ मयार्पितानिसर्वाणिपूजार्थंप्रतिगृह्यतां ॥ १७ ॥
इतिपुष्पं ॥ वनस्पतिरसोत्पन्नंसुगंधाढ्यंमनोहरं ॥ आघ्रेयःसर्वदेवानांधूपोयं
प्रतिगृह्यतां ॥१८ ॥ इतिधूपं ॥ घृतवर्त्तिसमायुक्तं तथाकर्पूरसंयुतम् ॥ दीपंगृ
हाणदेवेशत्रैलोक्यतिमिरापहं ॥१९॥ इतिदीपं ॥ अन्नंचतुर्विधंस्वादुरसैःषड्
भिसमन्वितं॥भक्ष्यभोज्यसमायुक्तं नैवेद्यंप्रतिगृह्यताम् ॥२०॥ इतिनैवेद्यं ॥
तथाच ॥ सामवेदेआम्नायोपानिषादि नैवेद्यविधिः ॥ कृताह्निकोवेदाध्या
यकोद्विजः ॥ पूतेनाचारेण । पूतेनमनसाऽभ्यंतराचारेण ॥ बाह्याचारेण ॥ धा
न्यं संस्कृत्य पचित्वा पाकं । वाग्जितोनारायणस्य पुरःसरं समर्प्य । पार्षदान्
सन्नह्य । घंटानादं निनदन् । दरवरोदकेनतुलसीदलमिश्रितेन पाकान्नंसर्वतो
परिवृताकृतिसंवेष्टयित्वाऽऽपोशनंदद्यादमृतोयस्तरणमसीत्यमृतं पिधानमसी

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



तितितोन्नं भगवद्रूपायशालिग्रामस्वरूपायनिवेद्यांतर्पुटंदत्वा बहिरागच्छेत् ॥पु
रुषसूक्तं तारक ब्रह्मजपःकृत्वा॥मध्येजलं निवेद्य क्षणिकोभूत्वा॥नैवेद्यंपरिसरेत्
पुनर्नादंनिनदन्नाचमनीयं चपेयं पीयूषममृतं फलेक्ष्वादिकंदत्वाप्साशुद्धेन साम्ना
मुखशुद्धिंदत्वातुलस्यांजलिंदद्यात्॥इतिश्रुतिः॥ ॐ विष्णुः॥३॥ इत्याचमनं ॥
नागवल्लीदलंदिव्यंपूगीखदिरसंयुतम् ॥ वक्रंसुरभिकृत्स्वादुतांबूलंप्रतिगृह्यताम्
॥२१॥ ॥ इतिताम्बूलं॥ ॥ सदीपंघृतकर्पूरपूरितंसप्तवर्त्तिकम् ॥ आर्त्तिक्यं
देवदेवेशसंगृह्णीष्वमयार्पितम् ॥२२॥ ॥ इत्यार्त्तिक्यं ॥ ॥ चंद्रसूर्यसमज्यो
तिराकाशतारासमन्वितम्॥शब्दभेर्यैत्रिदेवेशसंगृहाणार्तिकंप्रभो॥२३॥ ॥इति
पुनरार्त्तिक्यं॥ ॥यन्मयाभक्तियोगेनदत्रंपुष्पंफलंजलम्॥आवेदितंचनैवेद्यंत
द्गृहाणानुकंपया ॥२४॥ आवृतांमृदुपुष्पाणांवनस्पतिरसायुताम् ॥ पुष्पांजलि ४८

For Private And Personal

महंदघ्निसंगृहाणकृपानिधे ॥२५॥ ॥ **इतिपुष्पांजलिः॥** ॥ उपचारसमस्तै
स्तुयत्पूजाचमयाकृता ॥ तत्सर्वंपूर्णतांयातुअपराधंक्षमस्वमे॥२६॥ ॥ **इतिअ
पराधक्षमापनं ॥** ॥ यानिकानिचपापानिब्रह्महत्याशतानिच ॥ तानितानि
विनश्यंतिप्रदक्षिणपदेपदे ॥ २७ ॥ ॥ **इतिप्रदक्षिणा ॥** ॥ त्राहिमांपापि
नंघोरंधर्माचारविवर्जितम् ॥ नमस्कारेणदेवेशसंसारार्णवपातकम्॥ २८ ॥ **इति
नमस्कारं ॥** ॥ नीलांभोधरकांतिकायमनिशंवीरासनाध्यासनंमुद्रांज्ञानमयीं
दधानमपरंहस्तांबुजंजानुनि ॥ सीतांपार्श्वगतांसरोरुहकरांविद्युन्निभांराघवंप
श्यंतंमुकुटांगदादिविविधैःकल्पोज्ज्वलांगंभजे ॥२९॥ ॥ **इतिध्यानं ॥** ॥ क्षी
रसागरसमुद्रेतुशेषशय्यामहाशुभा॥तस्यांस्वपिहिदेवेशकुरुनिद्रांजगत्पते ॥३०
॥**इतिशयनं॥** ॥ तच्छय्यासुप्तोविष्णुर्लक्ष्मीश्चरणसेवनम् ॥ प्रणामंऋषयःसर्वे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



ब्रह्माभृगुश्चनारदः॥३१॥ ॥इतिचरणसेवनं॥ ॥ मंत्रहीनंक्रियाहीनंभक्तिहीनं
परात्पर॥पूजितोसिमयादेवपरिपूर्णंतदस्तुमे॥ ३२॥ ॥इतिस्तुतिकं॥आवाहनं
न जानामिनजानामिविसर्जनम्॥पूजांचैवनजानामित्वंगतिःपरमेश्वर॥३३॥ इ
तिविसर्जनमंत्रः॥ आसनंस्वागतंपाद्यमर्घ्यमाचमनीयकम्॥मधुपर्काचमनंस्ना
नंवसनाभरणानिच ॥ ३४ ॥ सुगंधंसुमनोधूपंदीपंनैवेद्यमेवच ॥ प्रार्थनाचरणा
र्चनाचअर्पणानिचषोडश ॥३५॥ ॥इतिपंचरात्रोक्तपूजाविधिः समाप्तः ॥

॥ अथागस्त्यसंहितोक्तपूजाविधिर्निरूप्यते ॥ ॥ सुतीक्ष्णउवाच ॥

हृदयेमानसीपूजाकीदृशीवदमेप्रभो ॥ उपचारैःकतिविधैः पूज्यतेरघुनंदनः
॥ १ ॥ ॥अगस्त्यउवाच ॥ रामंपद्मविशालाक्षंनीलाम्बुदसमप्रभम्॥ स्मित
वक्त्रंसुखासीनंचिंतयेच्चिंतितार्थदम् ॥२॥ रागादिकलुषंचित्तंवैराग्येणसुनिर्मलं॥ ४९

कृत्वाध्यायेत्सदारामंभवबन्धविमुक्तये ॥ ३ ॥ प्रातः शुद्धतनुर्भूत्वाशौचादिभिर
तंद्रितः ॥ विविक्तदेशमाश्रित्यध्यानंपूजांसमारभेत् ॥ ४ ॥ नाभिकंदसमुद्भूतं
कदलीकुसुमोपमम्॥अष्टपत्रंस्निग्धवर्णंध्यायेद्धृदयपंकजम्॥५॥ तत्पद्मंरामनाम्ने
वफुल्लंकृत्वास्यमध्यमे ॥ भावयेत्सूर्यसोमाग्निमण्डलान्युत्तरोत्तरम् ॥ ६ ॥ त
स्योपरिन्यसेद्दिव्यंपीठंरत्नमयोज्ज्वलम् ॥ तन्मध्येराघवंध्यायेत्कोटिसूर्य्यसम
प्रभम् ॥ ७ ॥इन्दीवरनिभंशांतंविशालाक्षंसुवक्षसं ॥ उद्यद्दीधितिमद्भासकुंडला
भ्यांविराजितम् ॥ ८ ॥ सुनासंसुकिरीटंचसुकपोलंशुचिस्मितम् ॥ विज्ञानमुद्रा
द्विभुजंकम्बुग्रीवंसुकुंतलम् ॥ ९ ॥ नानारत्नमयैर्दिव्यैर्हारैर्भूषितमव्ययम् ॥
विद्युत्पुंजप्रतीकाशवस्त्रयुग्मधरंहरिम् ॥१०॥ वीरासनस्थंसंतानतरुमूलंनिवा
सिनं ॥ महासुगंधलिप्तांगंवनमालाविराजितम् ॥ ११ ॥ वामपार्श्वेस्थितांसी

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



तांचामीकरसमप्रभां ॥ नीलपद्मधरांदेवींचारुहासांशुभाननाम् ॥ १२ ॥ पश्यं
तंस्निग्धयादृष्ट्यादिव्याकल्पविराजिताम् ॥छत्रचामरहस्तेनलक्ष्मणेनसुसेवित
म् ॥ १३ ॥ हनुमत्प्रमुखैर्नित्यंवानरैःपरिसेवितम् ॥स्तूयमानमृषिगणैःसेवितं
भरतादिभिः ॥ १४ ॥ सनन्दनादिभिश्चान्यैर्योगिवृंदैश्चसेवितम् ॥ सर्वशास्त्रा
र्थतत्त्वज्ञंयोगज्ञंयोगसिद्धिदं ॥१५॥ शुद्धेनमनसारामंपूजयेत्सततंहृदि ॥ १६ ॥
॥ **इतिध्यानम्** ॥ ॥ आवाहयामिदेवेशंजानकीवल्लभंविभुं ॥ कौसल्यातनयं
विष्णुंश्रीरामंप्रकृतेःपरम् ॥ १७ ॥ ॥ **इत्यावाहनम्** ॥ ॥ राजाधिराजराजें
द्ररामचंद्रमहीपते ॥ रत्नसिंहासनंतुभ्यंदास्यामिस्वीकुरुप्रभो ॥ १८ ॥ ॥ **इ
त्यासनम्** ॥ श्रीरामागच्छभगवन् रघुवीरनृपोत्तम ॥ जानक्यासहराजेंद्रसु
स्थिरोभवसर्वदा॥१९॥रामचंद्रमहेष्वासरावणान्तकराघव ॥ यावत्पूजांसमर्प्ये



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हंतावत्त्वंसन्निधोभव ॥ २० ॥ ॥ **इतिसंनिधानं** ॥ रघुनंदनराजर्षेरामराजी
वलोचन ॥ रघुनंदनमेदेवश्रीरामाभिमुखोभव ॥ २१ ॥ ॥ **इतिसन्मुखीक
रणं** ॥ प्रसीदजानकीनाथसुप्रसीदसुरेश्वर ॥ प्रसन्नोभवमेराजन्प्रसन्नोमधुसूद
न ॥ २२ ॥ ॥ **इतिप्रसन्नकरणं** ॥ ॥ शरणंमेजगन्नाथशरणंभक्तवत्सल ॥
वरदोभवमेराजन्शरणंमेरघूत्तम ॥ २३ ॥ ॥**इतिप्रार्थना**॥ ॥ त्रैलाक्यपावना
नंतनमस्तेरघुनायक॥पाद्यंगृहाणराजर्षेरामराजीवलोचन॥ २४ ॥ ॥ **इति
पाद्यं** ॥ ॥ परिपूर्णपरानंदनमोरामायवेधसे॥ गृहाणार्घ्यंमयादत्तंकृष्णविष्णो
जनार्दन ॥ २५ ॥ **इत्यर्घ्यं** ॥ ॥ नमः सत्यायशुद्धायज्ञानविज्ञानरूपिणे ॥
गृहाणाचमनंनाथसर्वलोकैकनायक ॥ २६ ॥ ॥ **इत्याचमनं** ॥ ॥ नमोस्तुवा
सुदेवायतत्त्वज्ञानस्वरूपिणे ॥ मधुपर्कंगृहाणेमंजानकीपतयेनमः ॥२७॥ **इति**

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मधुपर्कं ॥ ॥ पंचामृतंमयानीतंपयोदधिघृतंमधु ॥ सशर्करंतथादत्तंरामत्वंप्र
तिगृह्यताम् ॥ २८ ॥ **इतिपंचामृतं** ॥ ॥ ब्रह्मांडोदरमध्यस्थैस्तीर्थैश्वरघुनंद
न ॥ स्नापयिष्याम्यहंभक्त्यासंगृहाणजनार्दन ॥ २९ ॥ ॥**इतिस्नानं**॥ ॥ संत
प्तकांचनप्रख्यंपीतांबरमिदंहरे॥संगृहाणजगन्नाथरामचंद्रनमोस्तुते॥ ३०॥ **इति
वस्त्रं** ॥ ॥ श्रीरामाच्युतयज्ञेशश्रीधरानन्तराघव ॥ ब्रह्मसूत्रंचोत्तरीयंगृहाणर
घुनायक ॥ ३१ ॥ **इतियज्ञोपवीतं** ॥ ॥ किरीटहारकेयूररत्नकुंडलमेखलाः
॥ ग्रैवेयकौस्तुभोरस्कंरत्नकंकणनूपुराः ॥३२॥ एवमादीनिसर्वाणिभूषणानिनृ
पोत्तम ॥ अहंदास्यामिसद्भक्त्यासंगृहाणजनार्दन॥३३ ॥**इत्याभूषणं**॥प्रधान
देवनीयश्चसर्वमांगल्यकर्मणि॥प्रगृह्यतांदीनबंधोगंधोयंमंगलप्रद ३४**इतिगंधं**
कुंकुमागरुकस्तूरीकर्पूरोन्मिश्रचंदनम् ॥ तुभ्यंदास्यामिविश्वेशश्रीरामस्वीकुरुप्र

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भो॥३५॥इतिचंदनं॥तुलसीकुंदमंदारजातीपुन्नागचंपकैः॥कदंबकरवीरैश्वकुसु
मैःशतपत्रकैः ॥३६॥ नीलांबुजैर्बिल्वपत्रैःपुष्पमाल्यैश्वराघव ॥ पूजयिष्याम्यहं
भक्त्यासंगृहाणजनार्दन ॥३७॥ ॥ इतिपुष्पं ॥ ॥ पादौश्रीरामभद्रायनमः ॥
गुल्फौश्रीराजीवलोचनायनमः॥जंघेविश्वरूपायनमः॥जान्वोःश्रीरावणांतकाय
नमः ॥ कटौश्रीलक्ष्मणाग्रजायनमः ॥ मेढ्रेश्रीविश्वमूर्त्तयेनमः ॥ नाभौश्रीवि
श्वामित्रप्रियायनमः ॥ हृदिश्रीपरमात्मनेनमः ॥ कंठेश्रीकंठायनमः॥बाहौश्री
सर्वास्त्रधारिणेनमः ॥ मुखेश्रीरघूद्वहायनमः ॥ जिव्हायांश्रीपद्मनाभायनमः॥
दंतेश्रीदामोदरायनमः ॥ नासिकायांश्रीजलद्वर्णायनमः ॥ कर्णेश्रीश्रुतिगोच
रायनमः ॥ नेत्रेश्रीपुंडरीकाक्षायनमः ॥ ललाटेश्रीसीतापतयेनमः॥ शिरसिश्री
ज्ञानगम्यायनमः ॥सर्वांगेश्रीसर्वात्मनेनमः॥इत्यंगपूजा॥ वनस्पतिरसैर्दिव्यः

For Private And Personal

गंधाढ्यैस्सुमनोहरैः॥रामचंद्रमहीपालधूपोयंप्रतिगृह्यताम्॥३८॥ ॥इतिधूपं॥
ज्योतिषांपतयेतुभ्यंनमोरामायवेधसे ॥ गृहाणदीपकंरामत्रैलोक्यतिमिरापहं॥
॥३९ ॥ इतिदीपं ॥ ॥ इदंदिव्यान्नममृतंरसैःषड्भिस्समन्वितम् ॥ रामरा
जेंद्रनैवेद्यंसीतेशप्रतिगृह्यताम् ॥४०॥ ॥ इतिनैवेद्यं ॥ ॥ कर्पूरवासितंतोयंसु
वर्णकलशेस्थितम् ॥ गृहाणाचमनंनाथजानक्यासहराघव ॥ ४१ ॥ ॥इत्याच
मनं ॥ ॥इदंफलंमयादेवस्थापितंपुरतस्तव ॥ तेनमेसकलावाप्तिर्भवेज्जन्मनिज
न्मनि ॥ ४२ ॥ इतिफलदानं ॥ नागवल्लीदलैर्दिव्यंपूगीफलसमन्वितम् ॥ ता
म्बूलंगृह्यतांरामकर्पूरादिसमन्वितम् ॥ ४३ ॥ ॥इतिताम्बूलं॥ ॥ नृत्यगीतादि
वाद्यादिपुराणपठनादिभिः ॥ राजोपचारैरखिलैस्संतुष्टोभवराघव ॥ ४४ ॥ ॥इ ९२
तिराजोपचारः ॥ ॥ नमस्तेजानकीनाथरामचंद्रमहीपते ॥ पूर्णानन्दैकरूपाय

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

गृहाणार्घ्यंनमोस्तुते ॥४५॥ इत्यर्घ्यं ॥ ॥ मंगलार्थंमहीपालनीराजनमिदंहरे ॥
संगृहाणजगन्नाथरामचंद्रनमोस्तुते ॥४६॥ ॥ इतिनीराजनं ॥ अथस्तुति
प्रारंभः ॥ ॥ नमोदेवाधिदेवायरघुनाथायशार्ङ्गिणे ॥ चिन्मयानंदरूपायसीता
याःपतयेनमः॥४७॥सर्वलोकशरण्यायरामचंद्रायवेधसे ॥ ब्रह्मानंदैकरूपायसी
तायाःपतयेनमः ॥४८॥ श्रीरामाच्युतयज्ञेशश्रीधरानंतराघव ॥ श्रीगोविंदहरे
कृष्णनमस्तेजानकीपते ॥४९॥ ॐ नमोभगवतेश्रीरामायामिततेजसे ॥ ब्रह्मा
नंदैकरूपायससीतायनमोनमः ॥५० ॥ ॐ नमोभगवतेरांरामचंद्रायवेधसे ॥
सर्वलोकशरण्यायससीतायनमोनमः ॥ ५१ ॥ॐ नमोभगवतेश्रीवासुदेवायवि
ष्णवे ॥पूर्णानन्दैकरूपायससीताय० ॥५२॥ ॐ रांनमोभगवतेविष्णवेपरमा
त्मने॥परात्परायरामायससीताय०॥५३॥ॐ नमोभगवतेरांरामायपरमात्मने

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



॥ सर्वभूतांतरस्थायससीता० ॥५४॥ ॐनमोभगवतेश्रीरामकृष्णायचक्रिणे॥
विशुद्धज्ञानरूपायससीता०॥५५॥विशुद्धज्ञानदेहायरघुनाथायविष्णवे॥अन्तः
करणसंशुद्धिंदेहिमेभक्तवत्सल ॥५६॥ नमोनारायणानन्तश्रीरामकरुणानिधे॥
मामुद्धरजगन्नाथघोरसंसारसागरात् ॥५७ ॥ रामचंद्रमहीपालशरणागततत्पर
॥मांत्राहिसर्वलोकेशतापत्रयमहानलात् ॥५८ ॥ श्रीकृष्णश्रीकरश्रीशश्रीराम
श्रीनिधेहरे ॥ श्रीनाथश्रीमहाविष्णोश्रीनृसिंहकृपानिधे ॥ ५९ ॥ गर्भजन्मज
राव्याधिघोरसंसारसागरात् ॥ मामुद्धरजगन्नाथकृष्णविष्णोजनार्दन ॥ ६० ॥
श्रीरामगोविंदमुकुंदकृष्णश्रीनाथविष्णोभगवन्मुरारे ॥ श्रीवल्लभानंतजगन्निवा
सश्रीरामराजेंद्रनमोनमस्ते ॥६१ ॥ नमोस्तुनारायणविश्वमूर्त्तेनमोस्तुतेशाश्वत
सर्वयोगिने ॥ त्वमेवविश्वंसचराचरंचत्वयैवसर्वंप्रवदंतिसन्तः ॥६२ ॥ नमोस्तु



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तेकारणकारणायनमोस्तुकैवल्यफलप्रदाय ॥ नमोनमस्तेस्तुजगन्मयायवेदांत
वेद्यायनमोनमस्ते॥६३॥नमोनमस्तेभरताग्रजायनमोस्तुयज्ञप्रतिपालकाय॥अ
नंतविश्वेशहरेमुकुंदगोविन्दविष्णोभगवन्नमस्ते ॥ ६४ ॥ श्रीवल्लभानंतजगन्नि
वास श्रीरामराजेंद्रनमोनमस्ते ॥ त्वयासनाथंकुरुमामनाथंनाथप्रभोदीनदयालु
मूर्त्ते॥६५॥ **इतिस्तुतिः** ॥ तप्तजाम्बूनदेनैवनिर्मितं रत्नभूषणम् ॥ स्वर्णपु
ष्पंरघुश्रेष्ठदास्यामिस्वीकुरुप्रभो ॥ ६६ ॥ हृत्पद्मकर्णिकामध्येसीतयासहरा
घव॥ निवसत्वंरघुश्रेष्ठसर्वैरनुचरैःसह ॥ ६७ ॥ ॥ **इत्यासनं** ॥ ॥ मनो
वाक्कायजनितंकर्मयद्वाशुभाशुभम् ॥ तत्सर्वंप्रीतयेभूयान्नमोरामायशार्ङ्गिणः ॥
॥ ६८ ॥ अपराधसहस्राणिक्रियंतेऽहर्निशंमया॥दासोहमितिमांमत्वाक्षमस्व
रघुनंदन॥ ६९ ॥ ॥ **इतिप्रार्थना** ॥ ॥ एवंयःकुरुतेपूजांहृदयेवाबहिस्सदा॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



सकृत्पूजनमात्रेणरामएवभवेन्नरः ॥७०॥ किंपुनःसततंकुर्याद्ब्रह्मण्येवस्थितोहि
सः ॥ सर्वान्कामानवाप्नोतिइहलोकेपरत्रच ॥७१॥ इतिश्रीमदगस्त्यसंहिता
यांश्रीसुतीक्ष्णागस्त्यसंवादेश्रीसीताराममानसीपूजाकथनंनामत्रयस्त्रिं
शोऽध्यायः संपूर्णः॥अथद्वात्रिंशदपराधाः॥ ॥ आगमे ॥ यानैर्वापादुकै
र्वापिगमनंभगवद्गृहे ॥ देवोत्सवाद्यासेवाचअप्रणामस्तदग्रतः ॥ १ ॥ उच्छिष्टे
वा ऽथवाऽशौचेभगवद्दर्शनादिकं॥ एकहस्तप्रणामश्चतत्पुरस्तादप्रदक्षिणं ॥२॥
पादप्रसारणंचाग्रेतथापर्य्यंकबंधनं ॥ शयनंभक्षणंवापिमिथ्याभाषणमेवच॥ ३॥
उच्चैर्भाषामिथोजल्पोरोदनानिचाविग्रहः॥निग्रहानुग्रहौचैवनृषुचक्रूरभाषणं॥४
कंबलावरणंचैवपरनिन्दापरस्तुतिः ॥ अश्लीलभाषणंचैवअधोवायुविमोक्षणम्
॥५॥ शक्तौगौणोपचारश्चअनिवेदितभक्षणं ॥ तत्तत्कालोद्भवानांचफलादीना ५४

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मनर्पणम् ॥ ६ ॥ विनियुक्तावशिष्टस्यप्रदानंव्यंजनादिके ॥ पृष्टीकृत्यासनंचैव प
रेषामभिवादनम् ॥७॥ गुरौमौनं निजस्तोत्रंदेवतानिंदनंतथा ॥ अपराधास्तथा
विष्णोर्द्वात्रिंशत्परिकीर्तिताः ॥८॥ नामापराधयुक्तानांनामान्येवहरत्यघं ॥ अ
विश्रांतप्रयुक्तानितान्येवार्थकराणिच ॥ ९ ॥ इतिहरिभक्तिविलासे ॥ अथा
ष्टयाम ॥ निशांतःप्रातःपूर्वाण्हं मध्यान्हमपरान्हकं ॥ सायंप्रदोषोनक्तंचकाला
ष्टकमिदंविदुः ॥ १ ॥ स्नानंवेषंनिशान्तेच करोतिरघुनंदनः ॥ प्रभातेमृगया
लीलांगजाश्वरथपत्तिगैः ॥ २ ॥ पूर्वाण्हेभोजनंनिद्रांमध्यान्हेचसभागतं ॥ नृत्य
गीतादिवाद्यंचजलक्रीडादिकंतथा ॥ ३ ॥ अपराण्हेपुनर्लीलामस्त्रशास्त्रादिशिक्ष
णं॥ सायंकालेद्यूतक्रीडांप्रेमोध्यासमहोत्सवं ॥४॥ पुनःस्नानंप्रदोषेचवेषादिभो
जनंतथा ॥ नक्तंपर्य्यंकशयनंप्रियाप्रेमपरायणम् ॥ ५ ॥ श्रीसीतारामपादाब्जेसे

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



वायामानसीपरा॥ ब्राह्मेमुहूर्त्तेंचोत्थाय स्मरेत्तांसाधोकोत्तमः ॥ ६॥ श्रीपाद
तीर्थमाहात्म्यं ॥ ॥ ब्रह्माण्डे ॥ त्रिषुलोकेषुयत्तीर्थंतेषुस्नानेषुयत्फलं ॥ वि
ष्णुपादोदकंमूर्ध्नाधारणात्सर्वमाप्नुयात ॥ १ ॥ मानवोयस्तुगंगायांस्नानंदानंस
माचरेत ॥ तस्ययादृग्भवेत्पुण्यंतादृक्पादांबुधारणात् ॥२॥ पृथिव्यांयानिती
र्थानिप्रयागपुष्करादिकं ॥ तत्पादयुग्मेकृष्णस्यतत्रातिष्ठंतिनित्यशः ॥ ३ ॥ हृ
दिरूपंमुखेनामनैवेद्यमुदरेहरेः ॥ पादोदकंचनिर्माल्यंयस्यमूर्ध्निसवैष्णवः ॥४॥
**भागवते** ॥ पादोदकस्यमाहात्म्यं जानात्येवहिशंकरः॥ विष्णुपादोदकंपीत्वा
शुद्धिमाप्नोतितत्क्षणात् ॥५॥ विष्णुपादोदकंदेविपीत्वाशिरसिधारयेत्॥पुण्यपा
पविनिर्मुक्तोवैष्णवींगतिमाप्नुयात् ॥ ६॥ विष्णुगात्रेणसंस्पृष्टंपत्रंवापुष्पमेववा
॥ शिरसाधारयेद्योवैसयातिहरिमंजसा ॥७॥ पादोदकंपिबेन्नित्यंचक्रांकितशि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

लाहरेः ॥ प्रक्षालयातितत्तोयंब्रह्महत्यादिकंहरेत् ॥ ८ ॥ पेयंपादोदकंविष्णोवैष्णवानांविशेषतः ॥ तत्रनाचमनंकुर्याद्यथासोमेद्विजोत्तमैः ॥ ९ ॥ तीर्थप्रसादस्वीकारानंतरंवैष्णवोद्विजः ॥ नहस्तक्षालनंकुर्यान्नतत्राचमनक्रिया ॥ १० ॥

॥ **पद्मपुराणे** ॥ ॥ संसारमलपंकस्यविष्णुपादोदकंविना ॥ प्रक्षालनंनपश्यामिकल्पकोटिशतैरपि ॥ ११ ॥ विष्णुश्रीपादतीर्थंचकोटिजन्माघनाशनं ॥ तदेवाष्टगुणंपापंभूमौबिंदुनिपातनात् ॥ १२ ॥ परमाणुसमंतीर्थंयावत्संपतितंभुवि ॥ तावद्वर्षसहस्राणिपतंतिनरकेनरः ॥ १३ ॥ वस्त्रंचद्विगुणीकृत्यपाणौपाणिंनिवेशयेत् ॥ तस्मिंस्तीर्थंप्रतिष्ठाप्यत्रिःपिबेद्बिंदुवर्जितम् ॥ १४ ॥ विष्णुदेहपरामृष्टंमाल्यंपापहरंशुभं ॥ योनरः शिरसाधत्तेसयातिहरिमंजसा ॥ १५ ॥

**स्कंदपुराणे** ॥ ॥ सिरस्यातिष्ठतेयेषांनित्यंपादोदकंहरेः ॥ किंकरिष्यंतितेलो

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



कास्तीर्थकोटिमनोरथैः ॥ १६॥ ॥ पाद्मे ॥ ॥ छिन्नस्तेनमहासिनागर्भवासो
ऽतिदारुणः ॥ पीतंयेनसकृद्भक्त्याश्रीकृष्णचरणोदकम् ॥ १७ ॥ सुलभंकिंनसे
वेतहरेःपादोदकंशुभम् ॥ यस्यस्पर्शनमात्रेणप्रीतोभवतिमाधवः ॥ १८ ॥ सब्र
ह्मचारीसव्रतीआश्रमीचसदाशुचिः ॥ विष्णोःपादोदकंयेनमुखेशिरशिधार्यते ॥
॥ १९ ॥ ॥सामवेदेआम्नायोपनिषदःआंगिरसभाष्येभगवत्प्रसादाशन
विधिः ॥ ॥तत्प्रसादंषोडशाविष्वक्सेनादिपार्षदप्रवरेभ्यः सकाशात् गृहीत्वाघृ
णाऽतस्तेषांकृपातदनुज्ञाआपोशानमशित्वा ॥ प्राणायस्वाहेतितर्जन्यंगुष्ठमध्य
माभिर्ग्रसेत् ॥ अपानायस्वाहेतिमध्यमानामिकांगुष्ठेनचानामिकाकनिष्ठिकांगु
ष्ठैः ॥ व्यानायस्वाहेतितर्जन्यानामिकांगुष्ठैः ॥ उदानायस्वाहेतिसर्वैःपंचांगुली
भिः ॥ समानायस्वाहेतिपंचमान् जिव्हयाग्रसेत् ॥ पुनःआपोपिधानंमसीतिज



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

लंग्रसित्वाइष्टमंत्रैःमौनेनाशनंकरोतियोविद्वान्वैष्णवेइदंमहाप्रसादंयोगिदुर्ल
भंअष्टादशदोषरहितमशित्वा ॥इंद्रियवान् भवति ॥ जीवतियोग्येनजीवतिआ
युष्मान्दीर्घजीवीतेजस्वीयशस्व्यन्नादोभवति धर्मेणसप्तकेनधर्मीभवति॥अथ
भगवत्प्रसादमाहात्म्यं ॥ महोपानिषादि॥विष्णुनाऽश्नीतमश्नंतिविष्णुनाघ्रा
तंजिघ्रंतिविष्णुनापीतंपिबंति ॥ विष्णुनारसितंरसयंतितस्माद्विद्वांसोविष्णूपहु
तंभक्षयेयुरिति ॥ १ ॥ नैवेद्यमन्नंतुलसीविमिश्रंविशेषतःपादजलेनसिक्तम् ॥
योश्नातिनित्यंपुरतोमुरारेःप्राप्नोतियज्ञायुतकोटिपुण्यम् ॥ २ ॥ विष्णोर्निवेदितं
चान्नंयोश्नातिभुविमानवः ॥ सयातिपरमंस्थानंपुनरावर्तिवर्जितम् ॥ ३ ॥ पाद्मे
॥ भक्त्यालोभात्कौतुकाद्वाक्षुधासंयमनेपिवा ॥ आकंठभुक्तितोयद्वैपुनातिसक
लोदयात् ॥४॥ ममान्नंनिंदयेद्यस्तुममनिंदांकरोतियः ॥ मद्दर्शनेनयत्पुण्यंतत्स

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



वेंतस्यनश्यति॥५॥विष्णोर्निवेदितान्नंयोनाश्नातिस्पर्शशंकया ॥ वायसोविड्व
राहश्वविष्ठायांजायतेकृमिः ॥ ६ ॥ **परमेष्ठिसंहितायां** ॥ विष्णोर्नैवेद्यंसंत्यज्य
यःकुर्यादन्नभक्षणं ॥ सयातिनरकेघोरेयावच्चंद्रदिवाकरौ ॥ ७ ॥ विष्णुनिवेदि
तंशुद्धंपावनानांचपावनम् ॥ दुर्लभंपावनंभोज्यंनत्याज्यंस्यात्कदाचन ॥ ८ ॥
**दाल्भ्यः** ॥ अन्नपानादिकंविष्णोः प्रसादंनित्यसेवनं ॥ सर्वाघनाशनंसर्वपुण्य
दंमुक्तिदंशुभम् ॥ ९ ॥ विष्णोर्नैवेद्यमश्नीयात्वैष्णवस्तुविशेषतः॥ शतजन्मकृ
तंपापंतत्क्षणादेवनश्यति ॥१०॥ विष्णोर्नैवेद्यंदुष्यंतियेनरामूढचेतसः ॥ श्वान
योनिशतंप्राप्यपुनःसूकरतामियात् ॥११॥ ॥ **पंचरात्रे** ॥ ॥ यःश्राद्धकालेहरि
भुक्तशेषंददातिभक्तःपितृदेवतानाम् ॥तेनैवपिंडांश्वतिलैर्विमिश्रांस्तत्कोटिकल्पं
पितरः सुतृप्ताः॥१२॥विष्णोर्निवेदितान्नेनयष्टव्यंदेवतांतरम् ॥ पितृभ्यश्चापितद्दे ५७

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यंतदानंत्यायकल्पते ॥१३॥ श्राद्धेहोमेतथाभक्ष्येउपहारेतथैवच॥नदूष्यंवैष्णवं चान्नंपचेद्भक्तयायथाविधि॥१४॥ ॥ हारीतस्मृतौ ॥ ॥ कृपादत्तंहस्तदत्तंप्र सादंवैष्णवैर्द्विजः॥उपवासच्छलान्नात्तितमाहुर्ब्रह्मघातकम्॥१५॥बौधायनः॥ बदरीफलमात्रंवाप्यथवामलमात्रकम् ॥ उपवासादिनेश्नीयात्प्रसादंविष्णुमंदिरे ॥१६॥ ॥ दत्तात्रेयः ॥ ॥ भगवन्मंदिरंगत्वाप्रसादंपरमेष्ठिनः ॥ उपवासे तिनाश्नीयात्सएवहरिकंटकः ॥ १७ ॥ ॥ परमेश्वरसंहितायां ॥ ॥ एकादश्यां तुयोविप्रोनारायणपदच्युतम् ॥ तीर्थंप्रसादंनाश्नीयाद्विष्णवाज्ञाभंगकृद्विजः ॥ ॥१८॥ भगवन्मंदिरेदत्तंकृपयावैष्णवैर्यदि ॥ तत्रामलकमात्रंतुप्राशयेद्धरिवास रे ॥ १९॥ ॥ भरद्वाजसंहितायां ॥ ॥ योनदद्याद्धरेर्भुक्तंपितृणांश्राद्धकर्म णि ॥ अश्नंतिपितरस्तस्यविष्ठामूत्रंतुसद्विजैः ॥२० ॥ विष्णोर्निवेदितंनित्यंदेवे

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



भ्योजुहुयाद्धविः॥पितृभ्यश्चविशेषेणसर्वमानंत्यमश्नुते २१ विष्णवेकल्पितंचान्नं
दद्याद्भक्तेभ्यएवच॥वैश्वदेवंततःकुर्याच्छ्राद्धकर्मादिकंतथा ॥२२॥ हरिभुक्तशेषंद
द्यात्पितृणांचदिवौकसां ॥ तदेवजुहुयादग्नौभुंजीतापिस्वयंनरः ॥२३॥ यदा
लभेत्स्वसिद्धान्नंभुंजीतप्रोक्ष्यमंत्रतः ॥ विष्णुभुक्तमितिध्यात्वासात्विकस्तुविशे
षतः ॥२४॥ ॥वसिष्टस्मृतौ॥ ॥ स्वयंव्यक्तानिस्थानानिश्रीरंगवेंकटा
दयः ॥ मद्भक्तःशेषमादायगृहबिंबेनिवेदयेत् ॥२५॥ ॥ उशनाआह ॥
ग्रामप्रतिष्ठाशेषंतुगृहार्चायांनिवेदयेत् ॥ ततोंतर्यामिनंदद्यात्स्वयंभुंजीतवैष्ण
वः ॥२६॥ प्राणेभ्योजुहुयादन्नंमन्निवेदितमुत्तमं ॥ ममापिहृदयस्थस्यपितृभ्यश्च
विशेषतः ॥ २७ ॥ वैष्णवान्नंसदाश्नीयाद्विष्णुसायुज्यहेतवे ॥ वैष्णवान्नंत्यजे
द्योवैसयातिनरकंध्रुवं ॥२८॥ ॥भागवते॥ ॥ महाप्रसादेगोविंदेनामब्रह्म



For Private And Personal

णिवैष्णवे॥स्वल्पपुण्यवतांराजन् विश्वासोनैवजायते॥२९॥ ॥व्यासस्मृतौ॥
विष्णोस्तुपादसलिलंप्रसादंममशासनात्॥ उपवासादिने वापिप्राशयेदविचारय
न् ॥३० ॥ श्रीविश्वेश्वरदासनामविदुषायोध्यापुरीवासिना । श्रीरामानुजसम्प्र
दायविधिनोपात्तामयापद्धतिः ॥ सेयंश्रीरघुराजमंत्रविषयाश्रीवैष्णवानांमुदं ॥
कुर्वन्तीपरमांसदासुशुभगावर्वर्तुसर्वोपारि॥ ३१ ॥ ॥ इतिबृहद्वेदोक्त रा
मपद्धतिःसमाप्ता ॥ ॥ अथग्रंथकृतदैशिकगुरुपरंपरा ॥ अथसामवेदे
आम्नायोपनिषदिदैशिकगुरुपरंपरा ॥ ॥ अथैतामाम्नायोपनिषदं महाम
होपयुक्तां प्रथममाद्योनारायणःश्रियै अनुशशास ॥ तदा श्रीःसबुध्यामहदा
दितत्वपुरुषेभ्यश्च ॥ पार्षदेभ्योविष्वक्सेनादिभ्यश्च ब्रह्मणेऽनुशशास ॥ तेतत्व
पुरुषाद्या बृहदाचार्य्याः शतधृतिपुत्रेभ्यःसनकादिभ्योनारदाग्नयेंद्रायांगिरसाय

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



लोमशादित्येभ्यो रुद्रेभ्यःसर्वायचवरुणाय पितृपतये वसुभ्यश्च पिप्पलादयो
ह्यालकायचप्रदद्बु॥ तएतेहब्रह्मविदःशतधृतिपुत्राद्यावृदाचार्यानुयायिनस्त्वाचा
र्य्याबभूवुः॥ पुनस्तेभ्योभृगुःभार्गवःरोचिष्मान् ज्योतिष्मान् ज्योतिर्मुखवेदनि
धिवेदशिरापिप्पलादःशालावत्पोविषष्टंक्युतुंगागस्त्यगभस्तिश्चवनमेधावी गौ
ल्गुल्वादयश्चान्येप्यन्ये वार्वेद्यादयस्त्रातारश्चपोषकाआम्नायधर्माणामित्यनेना
चार्याभविष्यन्ति॥ आचार्यास्तेभ्योभारद्वाजातैतरेयोवसिष्ठात्पराशरःपिप्पला
दाद्वात्सद्वयं तृतीयोऽगिरसाद्वार्हस्पत्यादयश्चैतन्येप्यन्येभ्योयथाम्नायेनोपदिश
न्त्यन्योन्यमितियदायदाविरिष्टिंगताम्नायधर्मस्तदातदाहवेवावतारं गृभ्णाति
संदधामि॥ तमुपदिष्टमार्गेणैवाहंचतुष्कलांतर्गतकश्चित्कलारूपधृगहमुद्धरिष्या
मिविरिष्टिंलाप्स्यामि संदधिष्यामि ॥ तदाहंपूर्णश्चतुष्पात् चतुष्कलश्चतुर्व्यूहा



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्मनारायणस्तुष्येत्॥इतिधर्मत्राता।अबिष्मेहामित्यज्ञसृजस्व ममोदरस्थविश्वमि
त्युक्तासमेपापात्तुविहरेरन् समानंपरसमानं परमिति॥इतिसामाम्नायोपनिषदिदै
शिकगुरुपरंपरा ॥ अथग्रंथकृद्दैशिकगुरुपरंपरा ॥अस्मद्दैशिकमस्मदीयपरमा
चार्येण शेषानगुरून्॥ श्रीमल्लक्ष्मणयोगिपुंगवमहापूर्णमुनिंयामुनम् ॥ रामंप
द्मविलोचनंमुनिवरं नाथंशठद्वेषिणंसे॥नेशंश्रियमिन्दिरासहचरंनारायणंसंश्रये
॥१॥लक्ष्मीनाथसमारम्भांनाथया॥मुनमध्यमाम्॥अस्मदाचार्यपर्यंतांवन्देगुरु
परम्पराम्॥२॥मंत्राधिकारिणोह्येतेसम्प्रदायप्रवर्त्तकाः॥येषांमंत्रोपदेशेनप्राप्तंभा
गवतःपदम् ३ श्रीमन्नारायणःसाक्षाज्जीवलोकानुकम्पया॥गुह्याद्गुह्यतमंमंत्रंतार
कंतिमिरापहम् ४ देव्यानुबोधितःश्रीमान्विष्णुःसर्वजनेश्वरः॥ग्राहयामासतां
देवींमंत्रराजंतुतारकम्॥ ५ ॥ददौप्रीत्याततोदेवीविष्वक्सेनायसोपितम् ॥ बोपदे

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



वायोपदिशद्घोपदेवःपराङ्कुशम्॥६॥ग्राहयामाससमुनिः श्रीनाथमुनयेतदा॥स
पुनपुण्डरीकाक्षंमुनयेप्रददौमनुम्॥७॥राममिश्रायसददौराममिश्रोपियामुनम्॥
तंमनुंग्राहयामासदासनामपराङ्कुशम्॥८॥पराङ्कुशस्यचत्वारःशिष्यालोकेषु
विश्रुताः॥ श्रुतदेवःश्रुतप्राज्ञः श्रुतधामश्रुतोदधिः॥९॥ त्रिदण्डिनः शिष्यायु
क्तारामानुजश्चपंचमः॥रामानुजंसमाराध्यमन्त्रराजंषडक्षरम्॥१०॥ श्रीरामतार
कंनामकूरेशः प्राप्तवान्मुनिः॥ भट्टःपराशरस्तस्माल्लेभे मंत्रं रघूत्तमम्॥ ११॥
लोकाचार्यस्ततोलेभेततोदेवाधिपस्तथा ॥ श्रीशैलेशस्तस्यशिष्यस्तस्माद्वरव
रोमुनिः॥१२॥पुरुषोत्तमस्तस्यशिष्यस्तस्यगङ्गाधरोऽभवत्॥ सदाचार्यस्तस्य
शिष्यस्तस्यरामेश्वरोऽभवत्॥१३॥द्वारानन्दस्तस्यशिष्योदेवानंदोऽभवत्ततः
॥श्यामानंदस्तस्यशिष्यःश्रुतानंदस्ततोऽस्यच॥१४॥चिदानंदस्तस्याशिष्यः



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पूर्णानन्दस्ततोभवत् ॥ श्रियानंदस्तस्याशिष्योहर्षानंदोमहामतिः ॥ १५ ॥
राघवानन्दएतस्यरामानन्दस्ततोऽभवत् ॥ सार्द्धद्वादशशिष्याःस्युःश्रीरामानं
दसद्गुरोः ॥ १६ ॥ द्वादशादित्यसंकाशास्संसारतिमिरापहाः॥श्रीमदनन्तानन्द
स्तुसुरसुरानंदस्तथा॥१७॥नरहरीयानन्दस्तुयोगानन्दस्तथैवच ॥ सुखाभावा
गालवंचसप्तैतेनामनन्दनाः॥कबीरंचरमादासंसेनापिपाधनास्तथा॥१८॥ पद्मा
वतीतदर्द्धंचषडेतेचाजितेंद्रिया॥येषांशिष्यप्रशिष्यैश्चव्याप्ताभारतभारती॥१९॥
श्रीरामानंदशिष्योभूदनन्तानन्दनामवान्॥ येनप्रोक्तंकृष्णदासंमंत्रराजषडक्षर
म् २० दुग्धाहरिमहायोगंज्ञानवैराग्यशालिनम्॥कृष्णदासस्यशिष्योभूदग्रदा
सःप्रतापवान्॥२१॥येनप्रवर्तितोलोकेराममंत्रार्थविस्तरः॥एवंपरम्पराप्राप्तंमंत्र
राजंषडक्षरम् ॥ २२ ॥ येनराःकीर्त्तयिष्यन्तिवैष्णवास्तेप्रकीर्तिताः ॥ २३॥ ऐ

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



हलौकिकमैश्वर्यंस्वर्गाद्यंपारलौकिकम् ॥ कैवल्यंभगवन्तं च मंत्रोयंसाधयिष्य
ति ॥ २४ ॥ अश्वमेधसहस्राणिराजसूयशतानिच ॥ सकृत्षडक्षरंजप्त्वालभते
नात्रसंशयः ॥ २५ ॥ सर्वेषामेवमंत्राणांप्रथमंगुह्यमुत्तमम् ॥ मंत्ररत्नंनृपश्रेष्ठस
द्योमुक्तिफलप्रदम् ॥ २६ ॥ **अथ द्विपंचाशद्वाराख्या** ॥ रामानन्दोनिम्बादित्योवि
ष्णुश्यामः श्रीमाधवः ॥ चत्वारोधर्मशीलाश्चजगतिधर्मस्थापकाः ॥ १ ॥ एतेषा
मनुयायिनो द्विपंचाशद्दिजज्ञिरे ॥ अनन्तानंदाल्खरामौसुखानंदोनरहरिः ॥ २ ॥
भावानन्दकिलाग्रौचसुरसुरानन्दस्तथा ॥ पीपाखोजिजंगमाश्वत्यागिविरमथंभ
णाः ॥ ३ ॥ देवाकरानभानन्दौगोकुलोविठ्ठलस्तथा ॥ नाभाटीलाशोभुरामाःराघव
चेतनस्तथा ॥ ४ ॥ ज्ञानिनामापरशुरामौनामदेवकबीरकौ ॥ कुवाख्योदेवमुरारि
र्दुदुरामभगंडिनौ ॥ ५ ॥ चेतनस्वामीनागाख्यआत्मारामस्तथैवच ॥ नित्यान

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न्दोयोगानन्दोघभंडिमलुकस्तथा ॥ ६ ॥ भगवन्नारायणश्चरामरंगीतथैवच ॥
पूर्णवैराठीगोविंदोरामरावलएवच॥७॥राधावल्लभीहनुमान् लालतुरंगीएवच॥
चतुर्भुजीकर्मचन्दः कालुनयनाख्यस्तथा ॥ ८ ॥ श्रीमद्दनखंडीचैवरामरमाणि
एवच ॥ श्रीयुतमाधवश्चैवश्रीतनतुलसीतथा ॥९॥ **इतिश्रीद्विपंचाशद्धर्मद्वा**
**रप्रवर्त्तकाआचार्याः** ॥ रामंश्रीजानकीशं मनुकुलतिलकम् नागरीमोदयंतंरा
जन्यागर्वघातंयजनसुनिरतं नम्रशक्रादिदेवम् ॥ दारोद्धारंजनेशं सकलगुणग
णंदीनबंधुंदयालुम् यावद्दन्देसदाहमिनतनयसखं यंशिवोध्यायतीशम् ॥ १ ॥
॥ **श्रीमतेरामानुजायनमः** ॥ **शतानंदउवाच** ॥ ॥ अथवक्ष्येश्रीगुरुणांसं
प्रदायचतुष्टयम् ॥ तत्रापिप्रथमंश्रीमद्रामानुजगुरोःक्रमात् ॥ १ ॥ रामानुज
गुरोःकिंवाध्यानस्थानंकिमुच्यते ॥ किंक्षेत्रंकिंचतीर्थंस्यात्किंधामाथप्रकीर्तित

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



म् ॥ २ ॥ तथासुखविलासः कःकिमिष्टंकाउपासना ॥ कादीक्षाकिञ्चनामस्या
न्मंत्रंकिंवाऋषिश्चकः ॥ ३ ॥ देवताकाचकथितावैष्णवःकइहोदितः ॥ काशि
खाकिंचगोत्रंस्यात्काशाखावसनंतुकिम् ॥ ४ ॥ मेखलाअंचलाकंथात्राथसूत्रं
कथंभवेत् ॥ किमासनंचकःसंगःकोगुणश्चप्रकीर्तितः ॥ ५ ॥ काभिक्षाकिंचपात्रं
स्यात्कामुद्रातिलकंकथम् ॥ आनंदःकश्चकःशंखःकामालाकिंचतंत्रकम् ॥ ६ ॥
किंचातिगुह्यकाभक्तिःकिंगुह्यंकथितंबुधैः ॥ एतेषांप्रश्नराशीनामुत्तरंकथयाम्यह
म् ॥ ७ ॥ सनत्कुमारउवाच ॥ ॥ ध्यानस्थानंचशिरसिसहस्रदलपंकजे ॥
अयोध्यानगरीक्षेत्रंधनुःकोटिश्चतीर्थकम् ॥८॥ रामनाथाख्यकंधामबहुभिःप
रिकीर्तितम् ॥ तथासुखविलासःस्याच्चित्रकूटाख्यपर्वते ॥९॥ इष्टंविदेहतनयार
घुनाथउपासना ॥ ऋग्वेदस्तुवेदःस्यान्नामश्रीहरिनामकम् ॥ १० ॥ षडक्षरंम ६२

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हामंत्रंकथितंरामतारकम् ॥ योगवासिष्ठकंनामऋषिश्वकौशिकोमुनिः ॥ ११ ॥
देवताहनुमान्प्रोक्तोवैष्णवश्चश्रीवैष्णवः ॥ शिखावैस्वर्गनगरीगोत्रंचाच्युतगो
त्रकम् ॥ १२ ॥ शाखाअनंतशाखाचवसनंशुक्कमेवच ॥ कौपीनस्यद्वयंकुर्यात्प्र
त्येकंद्वादशांगुलम् ॥ १३ ॥ मेखलाकथिताह्यत्रतिस्रोवैमुंजमेखलाः ॥ अंचला
शुक्लवस्त्रंस्याद्वस्त्रद्वयप्रमाणतः ॥ १४ ॥ पंचहस्तप्रमाणंचसप्तदोरकशोभिनी॥
प्रशस्ताकथिताकंथाशुक्लवस्त्रचतुष्टयम् ॥१५॥ सार्द्धहस्तद्वयंकायंनामसूत्रैःसि
तैर्गुणैः॥ आसनंकथितंचात्रशुक्लकृष्णाजिनासनम् ॥ १६ ॥ विष्णूपासकसंगो
त्रसंगःसत्त्वगुणोगुणः॥तथाभिक्षाशुक्लभिक्षापात्रंचालाबुपात्रकम् ॥१७॥ अत्र
मुद्रातप्तमुद्राशंखचक्रगदादिकम्॥उर्ध्वपुंड्रंचतिलकंद्वादशांगेषुविन्यसेत् ॥१८॥
आनंदोविजयानंदःशंखश्चोदधिसंभवः ॥ मालाचक्रांकतुलस्याःशतमष्टोत्तरंत

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



था ॥ १९ ॥ अगस्तिसंहितातंत्ररामतत्वंतुगोपितम् ॥ भक्तिस्तत्पादसेवात्रम
नोवाक्कायकर्मभिः ॥२०॥गुह्यंश्रीवैष्णवानांचशरणामृतसेवनम्॥ एवंयःसंप्रदा
यीस्यात्सहिवैष्णवउच्यते॥२१॥इतिश्री आनंदतत्त्वदीपिकायांशतानंद
सनत्कुमारसंवादे श्रीरामानुजसंप्रदायचतुषष्टिपटलंसपूर्णम् ॥ श्रीअयो
ध्यानिवासिनाश्रीमद्भगवन्नारायणवंशोद्भव वैष्णव. रामनारायणदासे
नसंशोधिताबृहद्वैष्णव पद्धतिःसमाप्ताः ॥ ॥ ॥

इदं बृहद्वेदोक्त रामपद्धतिग्रंथः मुंबय्यां रासग्रामनिवासिना श्रीश्री१०८
महांतः श्रीगोकुलदासस्य शिष्य वैषणव रामदासेन जगदीश्वराख्य
मुद्रालयेमुद्रापितम् संवत् १९४७ भाद्रपद कृष्णपक्ष त्रयोदश्यां
अस्यग्रंथस्य पुनर्मुद्रणाद्यधिकाराग्रंथप्रकाशीकेन स्वहस्तेन रक्षिताः ॥



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

# रणहर पुस्तकशालाका सूचीपत्र.

१ बृहद्वेदोक्तरामपद्धति की० -॥- २ रामपद्धति -।— ३ रामपटल बडाअक्षरका ·।· ४ चोवीस गायत्री बडाअक्षर ·।· ५ सिद्धांतपटल -।- ६ भजनरत्नावलीमोटी जिस्मेप्रभाती. मंगलाआरती. सातोबारकेबालभोग. सिंघारआरती. सातोवारकेमंगल. गारी. आचवन. पानकीबीरिधरानेका. पंघतकीधुन. चारोधामकीबडीजै. सातोवारकीगौरी. मंगलसंजाके. सातोवारकीआरती. सातोवारकोधुन. आरतीसमयखडेगानेकीधुन. व्यारी. सयनआरती. पौढनी.इत्यादि.के पीछे.झुलण. वसंत. होली स्तुतिहे. सोसंतमहात्मा और भगवतके प्रेमीजनोकोतो बहुत उपयोगी हे सुगमकेलीयेकीमतभी १ रुपीया रखीहे टपालखर्चेदोआने. ७ गुरुचरितामृतमाषा. जीसमेआठविश्रामहै प्रथमगुरुमाहिमा. दुसरासरण महिमा. तिसरामं-·उपदेशमहिमा चौथाशेवामहिमा पांचवाकृपामहिमा छठ्ठाज्ञानमाहिमा सातवांअनुभवमहिमा आठवामोक्षमहिमा. और ६ त्तमे आठमहिमाका वरणनहैंसो तो जोकोईगुरुउपदेसीक हें उन्होको बहोत उपयोगीहै गुरुमहाराजका भजनके वास्ते की त ·।— है. वैदिक. वेदांत. पुराण. धर्मशास्त्र. न्याय. छंद. ज्योतिष. काव्य. अलंकार. चंपु. नाटक. कोश. वैद्यक. सांप्रदा ; स्तोत्रादी संस्कृत. हिंदुस्थानी. गुजराती. मराठी. इंग्रेजी इत्यादी भाषाके पुस्तके मीलसकतेहें मुंबई भावसे. जीनमहाशयोव. चाहिये वोबेसक मगवाई लीजीये हम भेजेंगे पत्र आयगा ओही दिनको. अपना नाम गाम जीला. तालुका पोष्टाफीस देव नागरी अक्षरोसे बरोबरलीखके भेजना हमकों.

तमामजातका पुस्तक मिलनेका ठिकाणा.

**वैष्णव. रामदासजी गुरुश्रीगोकुलदासजीमहाराज** ( रणहरपुस्तकशाला ) **मु० डाकोर.**

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥इतिबृहद्वेदोक्तरामपद्धतिः॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

-: प्रकाशक :-
भुवन-भद्रंकर साहित्य प्रचार केन्द्र,
C/o. V. V. VORA
34, KRISNAPPANICKEN TANK ST.
MADRAS - 600079.

प्राप्ति स्थान :-
लब्धि-भुवन जैन साहित्य सदन,
C/o. नटवरलाल चुनीलाल शाह
कापडनी दुकान,
मु: छाणी - ३९१७४०.
जि: वडोदरा - गुजरात.

For Private And Personal